जनकानां रघूनाञ्च यत् कृत्स्नं गोत्रमङ्गलम् ।
यां (१) देवयजने पुण्ये पुण्यशीलामजीजनः ॥५२॥

इति निष्क्रान्तः ।

सीता । हा सोम्म अज्जउत्त ! कहिं सि ? । सहसोत्थाय । हद्दी हद्दी ! दुस्सिविण-रणरणअविप्पलद्धाहं अज्जउत्तं आक्रन्दामि

वर्त्तन्ते, सुतराम् अस्मिन् समये राक्षसत्रासः असम्भव एवेति भावः । दुरात्मनः ऋषीणां विरुद्धाचरणेन पापात्मनः । कुम्भीनसी नाम काचित् राक्षसी तत्पुत्रस्य लवणस्येत्यर्थः । समुन्मूलनाय सम्यगुच्छेदाय । तथाच रामायनम्—

तस्य पत्नी महाभागा प्रिया कुम्भीनसीति या ।
विश्वावसोरपत्यं साप्यनलायां महाप्रभा ॥
तस्याः पुत्रो महावीर्य्यो लवणो नाम दारुणः ।
बाल्यात् प्रभृति दुष्टात्मा पापान्येव समाचरत् ॥

अभिज्ञानशकुन्तले शकुन्तलाया विरहविधुरस्य राज्ञो दुष्मन्तस्य विलापमाकर्ण्य तस्य समुत्तेजनार्थं यथा मातलेर्विदूषकनिपीड़न-वृत्तान्तो ग्रथितः तथाऽत्रापि सीताशोक-कातरस्य रामस्य समुत्तेजनार्थमयमंशः कविना निबद्ध इति तस्य छायाग्रहणमिवं तदिति प्रतिभाति ।

एवंविधा गर्भभरालसा । श्लाघ्यां सच्चरित्रादिभिः प्रशस्याम् ।

जनकानामिति । जनकानां जनकवंशानां रघूनां रघुवंशानाञ्च यत् वस्तु कृत्स्नं सकलं गोत्रमङ्गलं वंशस्य मङ्गलस्वरूपं तथा यां पुण्यशीलां पुण्ये पवित्रे देवयजने यज्ञस्थले अजीजनः त्वं उत्पादितवती ; तां दुहितरम् अवेक्षस्व इति पूर्वेणान्वयः ।

अत्र पूर्व्वार्द्धे निरङ्गं केवलं रूपकमलङ्कारः ।

सीतायाः प्राप्त्यनन्तरमेव जनकरघुवंशयोः प्रभूतमङ्गलोत्पत्तेः कृत्स्नं गोत्रमङ्गल-मित्युक्तं ॥५२॥

---

(१) ताम् इति पाठान्तरं

हद्धी हद्धी ! कधं एआइणी मं उज्झिअ अज्जउत्तो गदो। ता किं दाणिं एदं भोदु, तस्स कुविस्सं जइ तं पेक्खन्ती अत्तणो पहविस्सं। को एत्थ परिजणो ? (च)

(प्रविश्य दुर्मुखः।) देइ! कुमारलक्खणो विण्णवेदि, सज्जो रहो, आरोहदु देईत्ति। (छ)

सीता। इअमहं आरुहह्मि। (उत्थाय परिक्रम्य।) परिप्फुरदि विअमे गब्भभारो, ता सणिअं गच्छह्म। (ज)

(च)। हा सौम्य आर्य्यपुत्र ! कस्मिन्नसि ? हा धिक् हा धिक् दुःस्वप्नरणरणक विप्रलब्धाहं आर्य्यपुत्रम् आक्रन्दामि। हा धिक् हा धिक्! कथमेकाकिनीं मां उज्झित्वा आर्य्यपुत्रो गतः, तत् किमिदानीमेतत् ?। भवतु, तस्य कोपिष्यामि यदि तं प्रेक्षमाणा आत्मनः प्रभविष्यामि। कोऽत्र परिजनः ?।

(छ)। देवि ! कुमारलक्ष्मणो विज्ञपयति, सज्जो रथः, आरोहतु देवीति।

(ज)। इयमहमारोहामि। परिस्फुरतीव मे गर्भभारः, तत् शनैर्गच्छामः।

(च) सीतेति। हा सौम्य आर्य्यपुत्र! कस्मिन्नसि इत्यन्तः स्वप्नप्रलापः। हा धिगित्यादिना तदेव प्रकटयति। दुःस्वप्नेषु यः रणरणक उद्वेगस्तेन विप्रलब्धा 'रामोऽत्र नास्त' इत्येवंरूपेण प्रतारिता अहं आर्य्यपुत्रं रामम् आक्रन्दामि आह्वयामि "क्रन्दने रोदनाह्वाने" इत्यमरः। ननु वस्तुत एवार्य्यपुत्राह्वानप्रयोजनमस्तीति भावः। इतस्ततो दृष्टिपातेन राममनवलोक्याह हा धिगित्यादि। उज्झित्वा परित्यज्य। एतत् मामेकाकिनीं परित्यज्य गमनम्, किं कथं कृतमितिशेषः। तन्न जानामीति भावः। तस्य कोपिष्यामि रामं प्रति कपटकोपं करिष्यामीत्यर्थः। प्रेक्षमाणा पश्यन्ती चात्मनः प्रभविष्यामि स्वाधीना स्यां तु शक्ष्यामीत्यर्थः। रामस्य रूपलावण्यदर्शनात् सर्वदैवाहमवशात्मा विस्मृतसकलहृदयभावा भवामि, सुतरां निर्दिष्टकोपं कर्त्तुं शक्नोमि नवेति महान् संशय एवेति भावः।

(छ) प्रविश्येति। सज्जः सम्भृतः गमनोपकरणादिना संयुक्तः।

(ज) सीतेति। परिस्फुरतीव चलतीव। शनैः मन्दं मन्दम्।

[illegible]। इदो इदो देई । (झ)

सीता। णमोणमो तवोधणाणं, णमोणमो रहुउलदेवदाणं, णमोणमो अज्जउत्तचरणकमलाणं, णमो णमो सअलगुरुअणाणं। (ञ)

इति निष्क्रान्ताः सर्वे । (ट)

इति चित्रदर्शनो नाम प्रथमोऽङ्कः ॥ (ठ)॥

———— ⁘ ————

(झ) इत इतो देवी ।

(ञ)। नमोनमस्तपोधनानाम्, नमोनमो रघुकुलदेवतानाम्, नमोनम आर्य्यपुत्रचरणकमलानाम्, नमोनमः सकलगुरुजनानाम् ।

(झ) दुर्मुख इति । इत इतः अस्मात् अस्मात् स्थानात् देवी आगच्छतु इति शेषः ।

(ञ) सीतेति । तपोधनानामित्यादौ सर्वत्र चतुर्थ्यर्थे षष्ठी ति पिङ्गलसूत्रे षष्ठी । आर्य्यपुत्रचरणकमलानामिति गुरुत्वाद्बहुवचनं ।

मङ्गल्यपुष्परत्नार्थैः पूज्याननभिवाद्य च ।
न निष्क्रमेद्गृहात् प्राज्ञः सदाचारपरो नरः ॥

इतिज्योतिषतत्त्वधृतवचनादत्र पूज्यानामभिवादनं कृतमिति बोध्यम् ।

(ट) इतीति । सर्वे सीतादुर्मुखपरिजनाः । राजमहिष्याः सीतायाः शरीररक्षार्थं नूनमेव तत्रबहुतरपरिजनसम्भवात् केवलसीतादुर्मुखयोः प्रत्यक्षत्वेऽपि निष्क्रान्ताः सर्व्वे इत्युक्तिर्नासङ्गता ।

(ठ) इतीति । चित्रस्य दर्शनं यत्र सः । नाम प्रसिद्धः । अङ्कः परिच्छेदः समाप्त इति शेषः । एवमन्यत्रापि व्याख्येयम् ।

प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः । इत्यादि ।

"अन्तनिष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः। इत्यन्तमङ्कलक्षणं साहित्यदर्पणे द्रष्टव्यमिति।

इति श्रीहरिदाससिद्धान्तवागीशविरचितायामुत्तररामचरितटीकायां
सर्व्वार्थबोधिनीसमाख्यायां प्रथमाङ्कविवरणं समाप्तम्॥०॥

—:०:—

द्वितीयोऽङ्कः।

नेपथ्ये। स्वागतं तपोधनायाः ?। (क)

प्रविश्याध्वगवेशा तापसी। अये! वनदेवतेयं फलकुसुमपल्लवार्घ्येण मामुपतिष्ठते। (ख)

(क) नेपथ्य इति। तप एव धनं प्राधान्येनोपार्जनीयं यस्यास्तस्याः स्वागतं सुखेनागमनं किम् इति काकुः, तत्रागमने कोपि क्लेशो न जातः किमित्यर्थः।

(ख) प्रविश्येति। अध्वगवेशा पथिकवेशा दण्डच्छत्रधारिणीत्यर्थः। वनदेवता वनाधिकारिणी तपःप्रभाववती काचन मानवी सन्न्यासिनी। सा चेयं पञ्चवटी-वाससमये सीतया सार्द्धं सखित्वं कृतवती वासन्ती च नामेति तृतीयाङ्के व्यक्तीभविष्यति। फलकुसुमपल्लवैर्विरचितमर्घ्यं तेन। उपतिष्ठते उपास्ते। "पथ्याराधनयोश्च" इत्यात्मनेपदम्। यद्यपि

"सिद्धार्थमक्षतञ्चैव दूर्वा च तिलमेव च।
यवं गन्धं फलं पुष्पमष्टाङ्गं त्वर्घ्य मुच्यते॥"

इति महाकपिलपञ्चरात्रादिवचनात् अष्टाङ्गार्घ्यं सम्भवति; किन्तु फलकुसुमपल्लव-रूपद्रव्यत्रयात्मकमर्घ्यं क्वापि न दृश्यते, तथापि यथालाभोपपन्नद्रव्यकल्पितार्घ्यस्यापि

प्रविश्य वनदेवता । अर्घ्यं विकीर्य । (ग)

यथेच्छं भोग्यं (१) वो वनमिदमयं मे सुदिवसः

सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति ।

तरुच्छाया तोयं यदपि तपसो (२) योग्यमशनं

फलं वा मूलं वा तदपि न पराधीनमिह वः ॥ १ ॥

दैवत्ववचनादेव वनभूमिसुलभैरष्टाङ्गार्घान्तर्गतैः फलकुसुमपल्लवैः कल्पितमर्घामभिहित-मिति न दोषः । तथाच गन्धर्वतन्त्रे –

"उक्तानुक्तं यथापुष्यैर्जलजैः स्थलजैरपि ।
पत्रैः सर्वैर्यथालाभं भक्तिमान् सततं यजेत् ॥"

(ग) प्रविश्येति । विकीर्य निक्षिप्य तापसौ प्रतीति शेषः ।

यथेच्छमिति । इदं वनं वो युष्माकं यथेच्छं यथाभिलाषं भोग्यं व्यवहार्यम् । तथा अयं क्रियमाणो दिवस इत्यर्थः मे मम सुदिवसः शुभदिनं तव समागमादिति शेषः । कथमित्याह, हि यस्मात् सतां लोकानां सद्भिः साधुभिः सङ्गः संसर्गः कथमपि अनिर्वचनीयेनेत्यर्थः पुण्येन भवति । वनस्य यथेच्छभोग्यत्वं प्रति हेतुमाह तरुच्छायेति । इह वने तरुच्छाया, तोयं जलं, तपसो योग्यं तपस्विनामुचितं फलं वा मूलं वा यदपि अस्ति इत्यशनं भोजनवस्तु इति शेषः, तदपि सर्वं वो युष्माकं न पराधीनं न परानुमत्यपेक्षमित्यर्थः स्वकीयमिदं सर्वं व्यवहार्यं न तु कस्यचिदपि अनुमतिरपेक्षणीयेति भावः ।

अत्र "अयं मे सुदिवसः, सताम्" इत्यादांशे सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, तथा यथेच्छभोग्यत्वरूपकार्यस्य अपराधीनत्वरूपकारणेन समर्थनादर्थान्तरन्यासान्तरश्च इत्यनयोः सजातीयसङ्करः ।

तथा सुदिवसत्वं प्रति हेतोरनुक्तेर्निर्हेतुत्वदोषः, स च "भवत्सङ्गात्, सङ्गो भवति सह पुण्येन सुजनै"रिति द्वितीयचरणपाठेन समाधेयः ।

'सतमाधौ पूजिते लोके' इत्यादि व्याडिः ।

शिखरिणी वृत्तम् ॥१॥

---

(१) यथेच्छाभोग्यमिति पाठान्तरम् । (२) तपसामिति क्वापि पाठः ।

तापः । किमत्रोच्यते । (घ)

प्रियप्राया वृत्तिर्विनयमधुरो (१) वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद्वा तदिदमविपर्य्यासितरसं
रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥ २ ॥

इत्युपविशतः ।

(घ) तापेति । अत्र भवत्याधिकृते वने किमुच्यते मयेति शेषः । अत्र सदाचार-विनयादिकं सर्व्वमेव सुस्थितमिति किमपि वक्तव्यं नास्तीति भावः ।

तदेव सदाचारादिकं दर्शयति प्रियेति । साधूनां सज्जनानां वृत्तिः व्यवहारः प्रायेण प्रियेति प्रियप्राया बाहुल्येन प्रीतिकारिणीत्यर्थः, वाचि वाक्ये नियमः रीतिः वाक्यव्यवहार इति यावत् विनयेन मधुरः मनोहरः, तथा मतिर्बुद्धिः प्रकृत्या स्वभावेनैव कल्याणी परेषां मङ्गलकारिणी, तथा परिचयः परस्परं विशेषेण ज्ञानम् अनवगीतः प्रतारणादि-दोषाभावात् अनिन्दितः । सुतरां पुरः प्रथमे वा पश्चात् शेषे या अविपर्य्यासितः अपरिवर्त्तितः रसः अनुरागो यस्मिन् तत् तथोक्तम् तत् प्रसिद्धमिदम् अनुपधि कपटताशून्यम् अतएव विशुद्धं निर्म्मलं रहसि निर्ज्जने भवम् अन्यैरज्ञेयं चरित्रमित्यर्थः विजयते उत्कर्षेण वर्त्तते ।

अत्र अप्रस्तुतात् साधुचरित्रसामान्यात् प्रस्तुतस्य वनदेवताचरित्ररूपविशेषस्य प्रतीतेरप्रस्तुतप्रशंसाऽलङ्कारः । तथा चरित्रोत्कर्षं प्रति प्रियप्रायत्वमित्वप्रभृतिबहुकारणोक्तेः समुच्चयश्चानयोरङ्गाङ्गिभावेन सङ्करः ।

"कपटोऽस्त्री व्याजदम्भोपधयश्छद्म कैतव" इत्यमरः ।

विजयत इति "विपराभ्यां जि" रित्यात्मनेपदम् ।

शिखरिणी वृत्तम् ॥२॥

---

(१) मधुर इति पाठभेदः ।

वन। कां पुनरत्रभवतीमवगच्छामि ? । (ङ)

ताप। आत्रेय्यस्मि । (च)

वन। आत्रेयि! कुतः पुनरिहागम्यते, किं प्रयोजनं वा दण्डकारण्यप्रवेशे ? (१) । (छ)

आत्रेयी। अस्मिन्नगस्त्यप्रमुखाः प्रदेशे
भूयांस उद्गीथविदो वसन्ति ।
तेभ्योऽधिगन्तुं निगमान्तविद्यां
वाल्मीकिपार्श्वादिह पर्य्यटामि ॥ २ ॥

(ङ) वनेति । भवती का इति ज्ञातुमिच्छामीत्यर्थः ।

(च) तापेति । ब्राह्मणवत् सकलसंस्कारैः संस्कृता काचित् ब्राह्मणजातीया स्त्री आत्रेयी । तथाच यमः

"जन्मप्रभृतिसंस्कारैः संस्कृता ब्रह्मवच्च या ।
गर्भिणी या तथा या स्यात्तामात्रेयीं विनिर्द्दिशेत् ॥",

अस्या विशेषनामापि देवदत्तादिवदात्रेयीति बोध्यम् ।

(छ) वनेति । । कुतः कस्मात् स्थानादित्यर्थः ।

अस्मिन्निति । अस्मिन् प्रदेशे दण्डकारण्यभूभागे अगस्त्यप्रमुखाः अगस्त्यादयो भूयांसः बहव, उद्गीथः सामवेदस्य अंशविशेषस्तं विदन्ति ये ते उद्गीथविदः विशेषवाचिन उद्गीथशब्दस्य सामान्यपरत्वाङ्गीकारात् सामवेदज्ञा इत्यर्थः, वसन्ति । तेषां वेदज्ञत्वेन वेदान्तज्ञत्वम् अवश्यमेव सम्भवपरमिति भावः । तेभ्योऽगस्त्यप्रमुखमुनिभ्यः निगमो वेदः तस्यान्तः शेषभागः तद्विद्यां वेदान्तविद्याम् उपनिषदमितियावत् अधिगन्तुमध्येतुं, वाल्मीकिपार्श्वात् वाल्मीकिराश्रमादित्यर्थः इह दण्डकारण्ये पर्य्यटामि अगस्त्यादिनामाश्रमसमन्विष्यान्विष्य परिभ्रमामीत्यर्थः ।

"ओमित्येकाक्षरमुद्गीथमुपासीत" इत्यादि छान्दोग्योपनिषत् ।

---

(१) किम्प्रयोजनो वा दण्डकारण्यप्रचार इति पाठान्तरम् ।

वन । यदि तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचेतसमृषिं ब्रह्मपारायणायोपासते, तत् कोऽयमत्रार्य्याया दीर्घप्रवासप्रयासः ? (ञ)

आत्रे । तत्र महानध्ययनप्रत्यूह इति दीर्घप्रवासोऽङ्गीकृतः । (झ)

वन । कोऽसौ ? ।

"वेदान्तो नाम उपनिषत् प्रमाणम्, तदुपकारीणि च शारीरकसूत्रादीनी"ति वेदान्तसारः ।

ननु "सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति । सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यदि जानीयान्मृतः सोऽधोगच्छती"ति तिथ्यादितत्त्वधृतनृसिंहतापनीयश्रुत्या स्त्रिया वेदाध्ययननिषेधेन कथमत्र "तेभ्योऽधिगन्तुं निगमान्तविद्या"मित्युक्तमिति चेत् सत्यं द्विविधाः स्त्रियः, ब्रह्मवादिन्यः गृहस्थाश्च, तत्र ब्रह्मवादिनीनां वेदाध्ययनं विहितमेव । यथा हारीतः—

द्विविधाः स्त्रियो ब्रह्मवादिन्यः सद्योवध्वश्च । तत्र ब्रह्मवादिनीनामुपनयनमग्नीन्धनं वेदाध्ययनं स्वगृहे च भैक्षचर्य्येति ।

यमश्च—पुराकल्पेषु नारीणां मौञ्जीबन्धनमिष्यते ।

अध्यापनञ्च वेदानां सावित्रीवाचनं तथा ।

अतएवोक्तश्रुतिस्तु गृहस्थायाः स्त्रिया वेदाध्ययननिषेधपरेति बोध्यम् । इन्द्रवज्रा वृत्तम् ॥३॥

(ञ) वनेति । पुराणः प्राचीनो ब्रह्मवादी वेदवक्ता तं प्राचीनवेदाध्यापकमित्यर्थः । प्राचेतसमृषिं वाल्मीकिमुनिम् । ब्रह्मणो वेदस्य पारे अन्ते अयनं गमनं तस्मै सम्पूर्णवेदज्ञानलाभायेत्यर्थः । उपासते आराधयन्ति अध्यापकत्वेनावलम्बन्त इत्यर्थः ।

(झ) आत्र इति । अत्र वाल्मीकेः सकाशे । अध्ययनप्रत्यूहः अध्ययनविघ्नः । "विघ्नोऽन्तरायः प्रत्यूहः" इत्यमरः ।

आत्रे । तस्य भगवतः केनापि देवताविशेषेण सर्वप्रकाराद्भुतं स्तन्यत्यागमात्रके वयसि वर्त्तमानं दारकद्वयमुपनीतम् । तत् खलु न केवलमृषीणामपि तु (१) सचराचराणां भूतानामान्तराणि तत्त्वान्युपस्नेहयति । (ञ)

वन । अपि ! तयोर्नामसंविज्ञानमस्ति ? । (ट)

आत्रे । तयैव किल देवतया तयोः कुशलवाविति नामनी प्रभावश्चाख्यातः । (ठ)

वन । कीदृशः प्रभावः ? ।

आत्रे । तयोः किल सरहस्यजृम्भकास्त्राण्याजन्मसिद्धानीति । (ड)

(ञ) आत्रे इति । तस्य भगवतः वाल्मीकेः सरप इत्यर्थः, केनापि अविज्ञातनाम्ना प्रभाविणेत्यर्थः, देवताविशेषेण आत्रेय्या तु नासौ देवता परिचिता किन्तु गङ्गेति कविरेव तृतीयाङ्के प्रकाशयिष्यति । स्तन्यत्यागमात्रके वयसि तृतीयवर्षारम्भे दारकद्वयं बालकयुगलं उपनीतम् उपस्थाप्य अर्पितम् । तत् दारकद्वयम् । सचराचराणां स्थावर-जङ्गमात्मकानां भूतानां प्राणिनाम् । तत्र जङ्गमभूतानि मनुष्यपशुपक्ष्यादयः, स्थावर-भूतानि केचित् वृहत्कायसर्पादयः, ये स्वस्थानाच्चलितुं न शक्नुवन्ति । आन्तराणि तत्त्वानि अन्तःकरणानि, उपस्नेहयति वात्सल्ययुक्तानि करोति ।

(ट) वनेति । नामसंविज्ञानं नामपरिचयः । अपिशब्दः प्रश्ने अस्ति किमित्यर्थः । भवत्याः इति शेषः ।

(ठ) आत्रे इति । तयैव देवतया गङ्गयेत्यर्थः । कुशो लवश्चेति नामनी (नामद्वयम्) आख्याते, प्रभावो माहात्म्यञ्च आख्यात इति वाक्यभेदेनान्वयः कर्त्तव्यः अन्यथा " नपुंसकानपुंसकयोर्नपुंसकमेकवच्च " ति वचनेन आख्यात इत्यस्य नपुंसकत्वं प्रसज्येत ।

(ड) आत्रे इति । रहसि निर्जने भव इति रहस्यं मन्त्रगतमहितानि ।

---

(१) केवलमृषीणामेव न किन्तु तिरश्चां भूतानामपि अन्तराणि इति पाठान्तरम् ।

जन। अहो नु भोः, चित्रमेतत् (१) (ढ)

आत्रे। तौ च भगवता वाल्मीकिना धात्रीकर्म्मवत्सलतां (२) परिगृह्य पोषितौ परिरक्षितौ च, वृत्तचौड़कर्म्मणोश्च (३) तयोस्त्रयीवर्जमितरा विद्याः सावधानेन परिनिष्ठापिताः, समनन्तरञ्च गर्भैकादशे वर्षे क्षात्रेण कल्पेनोपनीय तौ त्रयीविद्यामध्यापितौ। नह्येताभ्यामतिप्रदीप्तप्रज्ञाभ्यामस्मदादेः सहाध्ययनयोगोऽस्ति। (ण) यत —

(ढ) वनेति। अहोनुभोरित्यं कमेव विस्मयविशेषद्योतकमव्ययम्। एतत् सहरस्यज्ञकास्त्राणामाजन्मसिद्धत्वं चित्रम् आश्चर्यम् अन्येषां शिक्षयैव तद्दर्शनादिति भावः।

(ण) आत्र इति। तौ कुशलवौ। धात्रीकर्म्मणा उपमातृकार्य्येण वत्सलतां स्नेहं परिगृह्य स्वकीय समस्तविषयनिःस्पृहेणापि सता अतिमनोहरत्वात् तयोरुपरि ममतां विधायेत्यर्थः। पोषितौ वर्द्धितौ। वृत्तं सम्पन्नं चौड़कर्म्म चूड़ाकार्य्यं ययोः तयोः। तयोः कुशलवयोः त्रयीवर्जं वेदं विहाय इतरा व्याकरणादयो विद्याः, सावधानेन तयोः शिक्षा प्रयत्नतायताविशिष्टेन परिनिष्ठापिताः आरोपिताः तौ अध्यापिताविल्यर्थः। समनन्तरञ्च ततःपरञ्च गर्भात् मातृउदरसंयोगात् एकादशे गर्भौयनवमाससहितैकादशे इत्यर्थः क्षात्रेण कल्पेन क्षत्रियविधानानुसारेण उपनीय उपनयनसंस्कारं कृत्वा। अतिप्रदीप्तप्रज्ञाभ्यां प्रखरबुद्धिशालिभ्याम् एताभ्यां कुशलवाभ्यां सह अस्मदादेः मादृशस्वल्पबुद्धेर्जनस्येत्यर्थः अध्ययनयोगः; एकयोगेनाध्ययनं नहि अस्ति नहि सम्भवतीत्यर्थः। तत्र कारणमाह यत इति।

त्रयीं वर्जयतीति त्रयीवर्जं कर्म्मण्यण्, परिनिष्ठापिता इति क्रियाविशेषणमेतत्। एतच्च उपनयनात् प्राक् वेदोच्चारणनिषेधादुक्तम्। यथा मनुः—

(१) इति हि भोश्चित्रमिति क्वचित् पाठः। (२) धात्रीकर्म्मवस्तुत इति क्वापि पाठः। (३) वृत्तचौड़ौ च परिपाठितौ इति क्वचित् पाठः।

वितरति गुरुः प्राज्ञे विद्यां यथैव, तथा जड़े,
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
भवति च पुन (१) र्भूयान् भेदः फलं प्रति, तद्द यथा
प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः॥ ४॥

"नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते।
शूद्रेण हि समस्तावद्यावद्वेदे न जायते।"

गर्भैकादशैकादशवर्षयोः क्षत्रियाणामुपनयनमुख्यकालत्वात् गर्भैकादशे वर्षे इत्युक्तम्। तथाच मनुयाज्ञवल्क्यौ—

"गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः।"
गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम्।
राज्ञामेकादशे सैके विशामेके यथाकुलम्।"

भवभूतिप्रणीतस्य तिचिन्तामणौ सर्वमेतत् प्रपञ्चितम्।

रुरुचर्म, मौर्वी मेखला, अश्वसूत्रमयमुपवीतमित्यादिक्षत्रियोपनयनकल्पः मनुसंहितामिताचरादौ द्रष्टव्यः।

अत्र पयीतरा विद्या इत्यनेनैवोपपत्तौ त्रयीवर्जमिति वर्जशब्दोपादानादधिकपदत्वदोषः, स तु त्रयीतरा इति पाठेनैव समाधेयः।

वितरतीति। गुरुरध्यापकः प्राज्ञे बुद्धिमति छात्रे यथा विद्यां वितरति ददाति, जड़े निर्बोधे छात्रेऽपि तथैव विद्यां वितरतीत्यर्थः। तु किन्तु तयो र्ज्ञाने शास्त्रार्थबोधविषये शक्तिं सामर्थ्यं न खलु करोति बुद्धिमतश्छात्रस्य न खलु सामर्थ्यविशेषं जनयति, वा किंवा शक्तिं अपहन्ति निर्बोधच्छात्रस्य सामर्थ्यं न खलु विनाशयति सुबोधनिर्बोधयोः समानाध्यापनात् समानभावेनैव शास्त्रज्ञानं वर्द्धयितुमिच्छतीत्यर्थः। पुनः किन्तु फलं शास्त्रज्ञानं प्रति शास्त्रीयज्ञानप्रकाशकं फलं प्रत्यर्थः, भूयान् भेदः महावैषम्यं

(१) तयोरिति पाठान्तरम्।

वन । अयमसावध्ययनप्रत्यूहः ? । [त]

आत्रे । अपरश्च । [थ]

वन । अथापरः कः ? ।

आत्रे । अथ स ब्रह्मर्षिरेकदा मध्यन्दिनसमये [१] नदीं तमसामनुप्रपन्नः, तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं ददर्श, आकस्मिकप्रत्यवभासाञ्च देवीं वाचमनुष्टुभेन च्छन्दसा परिणतामभ्युदैरयत् । [२] [द]

भवति बुद्धिमान् च तुल्यं न शास्त्रज्ञानवान्, निर्बोधस्तु सर्वथैव कश्चित् ज्ञानहीनः कश्चिद्वा किञ्चिज्ज्ञानी स्यादित्यर्थः । तत् वैषम्यं यथा, शुचिर्निर्मलो मणिश्चन्द्रकान्तादि-रत्नं बिम्बोद्ग्राहे प्रतिबिम्बग्रहणे प्रभवति समर्थो भवति, मृदां चयः मृत्तिकानां स्तूपः न बिम्बोद्ग्राहे प्रभवतीत्यर्थः । युगपत् समानमधीयानानां मध्ये कस्यचिद् बुद्धिमतो ज्ञानोत्कर्षं अन्येषामल्पमतीनां तदध्ययनं नितान्तापमानकरमिति सर्वेषां ममाध्ययन प्रत्यूह इति भावः ।

अत्राप्रस्तुतात् प्राज्ञसामान्यात् प्रस्तुतयोः प्राज्ञविशेषयोः कुशलवयोः प्रतीतिः तथा अप्रस्तुतात् जड़सामान्यात् प्रस्तुतस्य यौष्पजड़विशेषप्रतीतेश्च अप्रस्तुतप्रशंसा, तथा प्राज्ञे न खलु शक्तिं करोति, नवा जड़े शक्तिं अपहन्तीति क्रमिकान्वयबोधात् यथा-संख्यं तथा श्रौती उपमा चेत्येतेषामङ्गाङ्गिभावेन सङ्करालङ्कारः ।

तथा 'न मृदां चयः' इत्यत्र तुशब्दः किन्तुशब्दो वा वाच्यो नोक्त इति वाच्यानभि-धानदोषः स तु 'नतु मृच्चय' इति पाठेन समाधेयः ।

प्राज्ञे जड़े इति सम्प्रदाने अधिकरणत्वविवक्षया सप्तमी ।

हरिणी वृत्तम् ॥ ४ ॥

(त) वनेति । अत्र असौ इति तच्छब्दसमानार्थः, तेन सोऽयमित्यर्थः ।

(थ) आत्र इति । अपरश्च तदध्ययनप्रत्यूहोऽस्तीति शेषः ।

(द) आत्र इति । ब्रह्मा ब्राह्मणश्चासौ ऋषिश्चेति ब्रह्मर्षिः । मध्यन्दिनसमये,

---

(१) माध्यन्दिनसवनाय इति पाठान्तरम् (२) अनुष्टुप्छन्दसा परिच्छिन्नामिति पाठभेदः ।

"मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्" ॥ ५ ॥ इति।

मध्याह्नकाले । तमसां तमसाभिधानां नदीं अनुप्रपन्नः प्राप्तो गत इत्यर्थः । युग्मेन मिथुनभावेन चरत इति युग्मचारिणौ तयोर्विहरतोरित्यर्थः, क्रौञ्चयोः पक्षिविशेषयोः एकं पुरुषक्रौञ्चम् । विध्यमानं बाणेन ताड्यमानं आकस्मिकः सहसोत्पन्नः ननु चिन्ताप्रसूत इत्यर्थः, प्रत्यवभासः प्रकाशो यस्यास्ताम् । परिणतां स्वयमेव ग्रथितीभूतामित्यर्थः, अभ्युदैरयत् उच्चारितवान् ।

दिनस्य मध्यमिति मध्यन्दिनम् 'धन्वनड्हादयश्च' इति निपातनात् सिद्धम् ।

'क्रुङ् क्रौञ्चोऽथ बकः कह्व' इत्यमरः ।

अनुष्टुप्छन्दसो लक्षणं यथा श्रुतबोधे —

'पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
गुरु षष्ठन्तु पादानां शेषेष्वनियमो मतः ॥'

अतएव ज्ञापकादकारान्तोऽपि अनुष्टुभशब्दो मन्तव्यः ।

किमभ्युदैरयदित्याह मेति । हे निषाद ! चाण्डाल ! व्याध इति केचित्, त्वं शाश्वतीः समाः नित्यान् वत्सरान् चिरकालमित्यर्थः प्रतिष्ठां आश्रयं मा अगमः न प्राप्नुहि चिरकालं त्वं सुखेनावस्थानं न प्राप्स्यसीत्यर्थः, यत् यस्मात् त्वं क्रौञ्चमिथुनात् (कोचवक इति प्रसिद्ध) पक्षिविशेषद्वयमध्यादित्यर्थः कामेन मोहितं विषयान्तरज्ञानशून्यमित्यर्थः अन्यथा हन्तुं त्वं नाशक इति भावः, एकं पुंक्रौञ्चम् अवधीर्निहतवानसि । इति सम्भाव्यमानमात्रोक्तिर्न त्वभिसम्पातः ।

अतएव ब्रह्मर्षिवाक्यात् "शृङ्गाराहारनिद्राणां यश्च भङ्गं करोति च । स व्रजेत् कालसूत्रञ्च स्वामिनश्च विशेषतः ।" इति ब्रह्मवैवर्त्तपुराणाच्च रममाणताडनहत्यादिकं पापजनकमिति बोध्यम् ।

निषादश्वपचावन्तेवासि-चाण्डाल पुक्कसाः ।
सम्वत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समाः ।
शाश्वतस्तु ध्रुवो नित्यमिति चामरः ।

वन । चित्रम् । आम्नायादन्योऽयं नूतनश्छन्दसामवतारः । (ध)

आत्रे । तेन खलु पुनः समयेन तं भगवन्तमाविर्भूतशब्दब्रह्मप्रकाशमृषिमुपसंगम्य भगवान् भूतभावनः पद्मयोनिरवोचत्; ऋषे ! प्रबुद्धोऽसि वागात्मनि ब्रह्मणि, तद्ब्रूहि रामचरितम्,

---

वाल्मीकिना शोकेनोच्यमानत्वादिदमेव वाक्यं प्रथमं श्लोकनामाऽभूत् । तथाच वाल्मीकीयरामायणम् —

तस्येत्थं ब्रुवतश्चिन्ता बभूव हृदि वीक्षतः ।
शोकार्त्तेनास्य शकुनेः किमिदं व्याहृतं मया ।
चिन्तयन् स महाप्राज्ञः चकार मतिमान् मतिम् ।
शिष्यञ्चैवाब्रवीद्वाक्यं इदं स मुनिपुङ्गवः ।
पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ।

एतदनुसारादेव अन्यदपि छन्दोबद्धं वाक्यं श्लोक इत्यभिधीयते । तथा इमं श्लोकं सार्द्धद्वयवर्षमध्ये चेत् सुस्पष्टं कर्त्तुं शक्नुयात् तदा स बालको महामेधावी स्यादिति लोकप्रवादः ॥५॥

(ध) वनेति । चित्रम् आश्चर्यं श्रुतमिति शेषः । आम्नायते सम्यगभ्यस्यत इत्याम्नायो वेदः इत्याभ्यासेऽर्थे म्नाधातोर्घञ् श्रुतिः स्त्री वेद आम्नाय इत्यमरः । आम्नायाद् वेदात् वेदान्तर्गतानुष्टुप् छन्दस इत्यर्थः अन्यो भिन्नो नूतनः प्रथमः अयं छन्दसां अवतारः आविर्भावः । वेदे ईदृक् छन्दोऽस्त्येव किन्तु मनुष्यकृतभाषायामयमेव प्रथमोऽनुष्टुभ आविर्भाव इत्यर्थः । तथाच वेदान्तदर्शनभाष्ये शङ्करभगवत्पूज्यपादधृतम् ।

एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः । कठोपनिषद्वाक्यम् ।

उपनिषदादौ ईदृशान्यपराण्यपि अविकलान्यनुष्टुप्छन्दांसि दृश्यन्ते ।

(न) आव इति । तं वाल्मीकिं । आविर्भूतः प्रकाशितः शब्दब्रह्मणः सानिषादेत्यादिशब्दरूपपरमात्मनः प्रकाशः विकाशः उच्चारणमिति यावत् यस्मात् तं तथोक्तम् ।

अव्याहतज्योतिरार्षं ते चक्षुः प्रतिभातु, आद्यः कविरसि, इत्युक्त्वान्तर्हितः। अथ भगवान् प्राचेतसः प्रथमं शब्दब्रह्मणस्तादृशं विवर्त्तमितिहासं रामायणं प्रणिनाय। [न]

भूतानि प्राणिनः भावयति उत्पादयतीति भूतभावनो जगत् स्रष्टा पद्मं विष्णोर्नाभिकमलं योनिरुत्पत्तिस्थानं यस्य सः पद्मयोनिर्ब्रह्मा । वागात्मनि शब्दरूपे ब्रह्मणि प्रबुद्धोऽसि प्रकृष्टज्ञानवानसि बाहुल्येन शब्दब्रह्म ज्ञातवानसीत्यर्थः। तत्तस्मात्। रामचरितकथने यावती भाषाज्ञानस्यावश्यकता तावत्तव जातमिति भावः।

ननु साम्प्रतमपि सीतारामौ जीवतः सुतरामज्ञातत्वात् तयोर्भविष्यच्चरितकथनमसम्भवमेव इत्यत आह अव्याहतेति। अव्याहतं केनाप्यनिवारितसामर्थ्यं ज्योतिस्तेजो यस्य तत्तादृशम् आर्षं ऋषिसम्बन्धीयं चक्षुः प्रतिभातु, भूतभविष्यद्वर्त्तमानज्ञानं तव भवत्वित्यर्थः अतएव तव भविष्यतोऽपि सम्यग् ज्ञानात् भविष्यद्रामचरितकथनं नासम्भवमिति भावः। आद्यः कविः प्रथमो वर्णनाकारो विद्यमानसि सम्यग् रामचरितकथनादिति भावः। अथानन्तरम् प्राचेतसो वाल्मीकिः। शब्दब्रह्मणः शब्दस्वरूपब्रह्मणः। तादृशं विवर्त्तं रामायणत्वेन मिथ्याप्रतीतिविषयम् वास्तविकपक्षे रामायणाख्यः शब्दसमूहोऽपि ब्रह्मैव सुतरां तस्य रामायणत्वेन या पृथक् प्रतीतिः सा मिथ्याप्रतीतिरिव रज्जौ सर्पप्रतीतिवदिति बोध्यम्। इतिहासं पुरावृत्तम् रामोऽयते ज्ञायते यस्मात् तद् रामायणं तदाख्यं ग्रन्थं प्रणिनाय विरचयामास । तस्य रामायणस्यालोचनयैव कालो गच्छति नत्वध्यापनावसरोऽस्तीति द्वितीयो विघ्न इति बोध्यम्।

इदं कविभ्य इत्यादिश्लोकव्याख्यानावसरे शब्दस्य ब्रह्मत्वप्रतिपादिका श्रुतिरुक्ता॥ विवर्त्तं निरूपयति यथा वेदान्तसारे—

सतत्त्वतोऽन्यथा प्रथा विकार इत्युदाहृतः।
अतत्त्वतोऽन्यथाप्रथा विवर्त्त इत्युदीरितः॥

केचित्तु विवर्त्तः परिणाम इति वर्णयन्ति, तदसङ्गतं ब्रह्मणः परिणामाभावात्। तथाच वेदान्तदर्शनभाष्यटीकायां वाचस्पतिमिश्राः—

विवर्त्तस्तु प्रपञ्चोऽयं ब्रह्मणोऽपरिणामिनः।
अनादिवासनोद्भूतो न सारूप्यमपेक्षते॥

वन । हन्त ! तर्हि पण्डितः (१) संसारः । (प)

आत्रे । तस्मादवोचं, तत्र महानध्ययनप्रत्यूह (२) इति ।

वन । युज्यते । (फ)

आत्रे । विश्रान्तास्मि भद्रे ! सम्प्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि । (ब)

वन । इतः पञ्चवटीमनुप्रविश्य गम्यतामनेन गोदावरीतीरेण ।

आत्रे । सवाष्पं । अप्येतत्तपोवनम् ? अप्येषा पञ्चवटी ? अपि सरिदियं गोदावरी ? अप्ययं गिरि प्रस्रवणः ? अपि वनदेवता जनस्थानवासिनी वासन्ती त्वम् ? । (भ)

वास । अस्त्येतत् सर्व्वम् । (म)

(प) वनेति । हन्तेति हर्षसूचकमव्ययम् । तर्हि तादृशरामायणे रचिते सति संसारी जगज्जनः पण्डितो जात इति शेषः । "मानिषादे" त्यादिवत् सरलभाषया रचितत्वेन रामायणस्य वेदादतिवसुगमत्वात् सर्व एव तत् बुधैरन्निति भावः ।

(फ) वनेति । युज्यते, त्वया यद्विप्रकारणं दर्शितं तद्युक्तिसङ्गतमित्यर्थः ।

(ब) आत्र इति । विश्रान्तास्मि कृतविश्रामास्मि ।

(भ) आत्र । इति । पूर्व्वं बहुशो दृष्टानाम् एकत्रावस्थितानां मध्ये वनदेवतया केवलपञ्चवटीगोदावर्य्योः परिचयकरणेनापि सर्वेषां ज्ञानोदयात् स्थिरनिश्चयाय क्रमश एकैकं पृच्छति अप्येतदिति । अयमपिशब्दः सर्वत्र प्रश्नबोधकः । तथाचामरः—

"गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि ।"

(म) वासेति । पूर्वम् आत्रेय्या 'वनदेवतेय' मिति सामान्यतो ज्ञातम्, इदानीन्तु वासन्तीत्वेन विशेषतः परिचिता, अतः सुतरां वासन्तीति नाम्ना उल्लेख एव श्रोतॄणां विशेषज्ञानं स्यादिति कविना पूर्वं 'वन' इत्युक्तम् इदानीन्तु तस्मिन्नर्थे 'वास' इति प्रयुज्यत इति न दोषः । एतत् सर्वम् अस्ति, त्वया यद्यत् पृष्टं तत्तदेव सत्यमस्तीत्यर्थः ।

---

(१) मण्डित इति पाठान्तरम् । (२) तदनुरोधान्नस्तत्र हि—इति पाठभेदः ।

आत्रे। वत्से! जानकि!

स एष ते वल्लभबन्धुवर्गः
प्रासङ्गिकीनां विषयः कथानाम्।
त्वां नामशेषामपि दृश्यमानः
प्रत्यक्षदृष्टामिव नः करोति॥ ६॥

वास। सभयं स्वगतम्। कथं नामशेषामित्याह?। प्रकाशम्।

आर्य्ये! किमत्याहितं सीतादेव्याः?। (य)

आत्रे। न केवलमत्याहितं सापवादमपि। (र)

वास। कथमिव? (ल)

स एष इति। प्रसङ्गेन परस्परालापप्रयोगेन संसृष्टा इति प्रासङ्गिक्यः तासां कथानां वाक्यानां विषयः प्रतिपाद्यः, अस्माभिः सह पूर्वं तव कथोपकथनसमये त्वया "वासन्ती अतिवविनयलक्ष्मासमधुरभाषिणी कश्चित् मम सखी आसीत्, पञ्चवटी-वनमतीवामोदस्थानं एवम् प्रकारेण वर्णित इत्यर्थः, दृश्यमानः सन्निति शेषः, स एष ते तव वल्लभः प्रियो बन्धुवर्गः। वनहरिणादीनामपि सीताया बन्धुमध्ये गणनात् वर्ग-शब्दोक्तिः। नामशेष अपि नाममात्रावशिष्टामपि मृतामपीत्यर्थः: नोऽस्माकं प्रत्यक्षदृश्यामिव साक्षाद्दर्शनीयामिव करोति। परिवारदर्शनात् परिवार्य्यस्य स्मारकत्वादितिभावः।

अत्र भावनिम्निनो वाच्या क्रियोत्प्रेक्षाऽलङ्कारः। तया अतीतायाः सीतायाः प्रत्यक्षायमाणत्वाद्भाविकालङ्कारश्चेत्यनयोरङ्गाङ्गिभावेन सङ्करः। उपजातिवृत्तम्॥ ६॥

(य) वासेति। अत्याहितं जीवानपेक्षि किमपि कर्म वृत्तं किं? येन कर्मणा जीवनं यातुमर्हति तादृशं किमपि कर्म जातं किमित्यर्थः।

"अत्याहितं महाभीतिः कर्म जीवानपेक्षि च" इत्यमरः।

(र) अत्रे इति। अत्याहितन्तु जातमेव तत्र कलङ्कोऽपि जात इति समुदायार्थः।

(ल) वासेति। कथमिव इत्यस्यार्थ "कैमन धारा" "कि रकम" इति प्रचलित-बङ्गभाषा।

आत्रे। कर्णे एवमेवं। (व)

वास। अहह! दारुणो दैवनिर्घातः। इति मूर्च्छति। (श)

आत्रे। भद्रे! समाश्वसिहि समाश्वसिहि।

वास। हा प्रियसखि! हा महाभागे! ईदृशस्ते निर्म्माणभागः। रामभद्र! रामभद्र! अथवा अलं त्वया, आर्य्ये आत्रेयि! अथ तस्मादरण्यात् परित्यज्य निवृत्ते लक्ष्मणे सीतादेव्याः किं वृत्तमिति काचिदस्ति प्रवृत्तिः?। (ष)

आत्रे। नहि नहि। [स]

(व) आत्र इति। "लङ्कायामेकाकिनी सीता स्थितेति नितरामेव तस्याश्चरित्र-दोषो जात इति लोकापवादेन रामस्यादेशात् लक्ष्मणो रथेन सीतामानीय महारण्ये जाह्नवीतीरे विसृज्य गतः" इत्येवमेव वाक्यं कर्णे कर्णसमीपे मुखमुपनीय कथयतीत्यर्थः अतोऽप्यन्यैरश्रवणार्थं कर्णे इत्युक्तं।

(श) वासीति। अहहेति महाखेदे। दैवनिर्घातः दैवदुष्टकृतप्रहारः।

(ष) वासीति! महाभागे! महाभाग्यवति! ते तव निर्म्माणभागः सृष्टेरंशः जीवनस्य शेषांश इत्यर्थः, ईदृशः, यत्त्वमशरणा महारण्ये मृतेति वाक्यशेषः। त्वमाद्य महि-ष्यस्तव अशरणायाः सत्या महारण्ये मरणं नितान्तविस्मयविषादकरमिति भावः। रामभद्र! रामभद्रेति विषादे द्विरुक्तिः। रामभद्र! लोकापवादमात्रेण त्वमीदृशीं प्राणप्रियतमां निर्व्वास्य नितरां लाञ्छितम् कृतवानिति भावः। अलं त्वया निन्दितेनेत्यर्थः, तव निन्दयेदानीं किमपि फलं नास्तीति भावः। वृत्तं भूतं का दशा जातेत्यर्थः इति अस्मिन् विषये काचित् प्रवृत्तिः कापि वार्त्ता अस्ति किमित्यर्थः। तव ज्ञातेति शेषः।

(स) आत्र इति। नहि काचिदपि प्रवृत्तिरस्तीति शेषः। अवधारणे द्विरुक्तिः।

वास। हा कष्टम्, आर्य्यारुन्धतीवशिष्ठाधिष्ठिते रघुकुलगृहे (१) जीवन्तीषु च प्रवृद्धराज्ञीषु कथमिदं जातम्? । (ङ)

आत्रे। ऋष्यशृङ्गसत्रे (२) गुरुजनस्तदासीत्। सम्प्रति परिसमाप्तं तद्द्वादशवार्षिकं सत्रम्, ऋष्यशृङ्गेण च सम्पूज्य विसर्जिता गुरवः, ततो भगवत्यरुन्धती "नाहं वधूरहितामयोध्यां गमिष्यामी" त्याह, तदेव राममातृभिरनुमोदितम्। तदनुरोधाद्भगवतो वशिष्ठस्य परिशुद्धा वाचो यथा, "वाल्मीकितपोवनं गत्वा तत्र वत्स्याम" इति। [च]

वास। अथ स राजा किमारम्भः (३) सम्प्रति? । (क)

आत्रे। तेन राज्ञा क्रतुरश्वमेधः प्रक्रान्तः। (ख)

(ङ) वासीति। आर्य्याभ्यां अरुन्धतीवशिष्ठाभ्यां अधिष्ठिते अवलम्बिते दुर्द्दैवशान्तियुक्तिदानादिना सर्व्वापद्भ्यो रक्षित इत्यर्थः। प्रवृद्धराज्ञीषु प्राचीनासु महिषीषु कौशल्यादिष्वित्यर्थः। इदं सीताया निर्व्वासनं। अरुन्धतीवशिष्ठादयः कथमस्मादृशाद्व्यापारात् रामं न निवर्त्तितवन्त इति भावः।

(च) आत्र इति। सम्पूज्य दानमानाभ्यां सत्कृत्य। विसर्ज्जिताः प्रेषिताः गुरवो वशिष्ठादयः। राममातृभिः कौशल्यादिभिः अनुमोदितं कर्त्तव्यतया स्वीकृतं। तदनुरोधात् तासां अरुन्धतीकौशल्यादीनामाग्रहात्। परिशुद्धा निर्दोषाः युक्तियुक्ता इत्यर्थः अभवन्निति शेषः।

(क) वासीति। अथ प्रश्ने। आक्रोशेन रामभद्र इत्यनुक्त्वा राजा इत्युक्तम्। कः प्रश्नविषयः जिज्ञास्य इति यावत् आरम्भो यस्य सः किमारम्भः। सम्प्रति किं करोत इत्यर्थः।

---

(१) अधिष्ठितेषु रघुकदम्बकेषु इति पाठान्तरम्। (२) ऋष्यशृङ्गाश्रमे इति क्वचित पाठः। (३) किमाचार इति पाठभेदः।

वास । अहह ! धिक्, परिणीतमपि । (ग)

आत्रे । शान्तं पापम् (घ)

वास । का तर्हि यज्ञे सहधर्म्मचारिणी ? । (ङ)

आत्रे । हिरण्मयी सीताप्रतिकृतिः (च)

वास । हन्त भोः । (छ)

(ग) वासेति । यथा "यजमानः पठतीति" श्रुतिप्रतिपादितपाठाभावात् मूकस्य यज्ञे अधिकाराभावः "तिर्य्यक्पङ्गवार्षेयदेवानां नावाधिकार" इति मीमांसादर्शनसूत्रात् तथा "सपत्नीको धर्म्ममाचरे" दिति विधौ सपत्नीकत्वस्य कर्त्तृविशेषणतया श्रूयमाणत्वेन पत्न्यभावे यज्ञे अधिकाराभावः स्यात् । अतएव निर्वासितसीतस्य रामस्यापि दारान्तरमन्तरेण यज्ञे अधिकारो न स्यादेव किन्तु "क्रतुरश्वमेधः प्रक्रान्त" इति श्रवणात् रामेण दारान्तरं संगृहीतमेवेति निश्चित्य निन्दति अहहेति ।

धिक् निन्दामीत्यर्थः । परिणीतमपि दारान्तरं संगृहीतमपीत्यर्थः । प्राणप्रियतमा सीता निर्वासिता, तदनन्तरञ्च न विपत्नीक एव तिष्ठेत्तदापि कियानाश्वासः स्यात् सत्यप्रेमिकत्वात्, परिणयान्तरे कृते तु मिथ्याप्रेमिकतया रामस्य नितान्तलघुत्वं तत्त्वमेव सम्भाव्यत इति भावः ।

(घ) आत्रे इति । पापं पापवत् अरुचिकरं रामस्य परिणयान्तरसम्बन्धीयवाक्यं शान्तं विरतं भवत्वित्यर्थः । रामेण परिणयान्तरं न कृतमिति भावः ।

(ङ) वासेति । सहधर्म्मचारिणी अभिन्नतया धर्म्मकारिणी पत्नीत्यर्थः ।

(च) आत्रे इति । हिरण्मयी सुवर्णमयी स्वर्णनिर्म्मितेत्यर्थः सीताप्रतिकृतिः सीतायाः प्रतिमा, यज्ञे सहधर्म्मचारिणीति वाक्यशेषः । युक्तञ्चैतत्—

"यथोक्तवस्तुसम्पत्तौ ग्राह्यं तदनुकारि यत् ।
यवानामिव गोधूमा व्रीहीनामिव शालयः ।"

इति कात्यायनवचनात् ।

(छ) वासेति । हन्तभोरिति हर्षविषादसूचकमेकमव्ययम् ।

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि कोहि विज्ञातुमर्हति ॥ ७ ॥

भावं । विसृष्टश्च वामदेवानुमन्त्रितो मेध्योऽश्वः, उपकल्पिताश्च यथाशास्त्रं तस्य रक्षितारः, तेषामधिष्ठाता च लक्ष्मणात्मजश्चन्द्रकेतुः दत्तदिव्यास्त्रसम्प्रदायः चतुरङ्गसाधनान्वितोऽनुप्रहितः (१) । (ज) ।

वज्रादपीति । वज्रादपि कठोराणि निष्ठुराणि कथमन्यथा प्राणप्रियतमां निर्वासयितुं समर्थानीति भावः, तथाकुसुमादपि मृदूनि पुष्पादपि कोमलानि स्नेहपरतन्त्राणीत्यर्थः कथमन्यथा निर्वासितायाः सीतायाः प्रतिमां सहधर्मचरणार्थमवलम्बन्त इति भावः । लोकोत्तराणां लोकश्रेष्ठानां चेतांसि मनांसि को जनो विज्ञातुं यथार्थतया बोद्धुं अर्हति अपितु कोपि नेत्यर्थः । प्राणप्रियतमा निर्वासितेति विषादः, पुनस्तस्या एव प्रतिमा यज्ञ सहधर्माचरणायावलम्बितेति आदरातिशयप्रकाशात् हर्षः । लोकापवादजनितप्रजावैरागमोचनार्थमेव सीता निर्वासिता, रामस्य तु सीतां प्रति गाढविश्वासः प्रणयातिशयश्चास्त्येव इति भावः ।

अत्र कठोरमृद्वोर्विरूपयोः सङ्घटनाद्विषमालङ्कारः, तथा अप्रस्तुतात् लोकोत्तरसामान्यात् प्रस्तुतस्य रामरूपविशेषस्य प्रतीतेरप्रस्तुतप्रशंसा अर्थापत्तिश्च इत्येतेषामङ्गाङ्गिभावेन सङ्करः ।

हीत्यर्थे हिशब्दः, तथाच चेतोवैचित्र्यात् विज्ञातुं नार्हतीत्यर्थः ॥ ७ ॥

(ज) भाव इति । वामदेवेन तदाख्येन केनचिन्मुनिना अनुमन्त्रितः मन्त्रपाठेन संस्कृतः, मेध्यः यज्ञे हिंसनीयः "मेधृ हिंसायां" मित्यस्मात् धातोः, अश्वमेधे हि छिन्नाश्वमांसेन हूयत इति प्रयोगो द्रष्टव्यम् । विसृष्टः प्रेरितः । शास्त्रं शास्त्रविधानमनतिक्रम्येति यथाशास्त्रं तस्य अश्वस्य रक्षितारः उपकल्पिताः निर्दिष्टाः, अधिष्ठाता

---

(१) 'चतुरङ्गबलान्वितोऽनुप्रहितः' इति पाठभेदः ।

वास। सस्नेहकौतुकास्रम्। कुमारलक्ष्मणस्यापि पुत्रः ? हन्त ! भ्रातर्जीवामि। (झ)

आव। अत्रान्तरे ब्राह्मणेन मृतं पुत्रमुत्क्षिप्य राजद्वारे सोरस्ताड़नमब्रह्मण्यमुद्‌घोषितं, ततो न राजापराधमन्तरेण प्रजास्वकालमृत्युश्चरतीति आत्मदोषं निरूपयति करुणामये रामभद्रे सहसैवाशरीरिणी वागुदचरत्। (ञ)

"शम्बूको नाम वृषलः पृथिव्यां तप्यते तपः।
शीर्षच्छेद्यः स ते राम ! तं हत्वा जीवय द्विजम्॥ ८॥

नेता सेनापतिरिति यावत् दत्तो दिव्यानामुत्कृष्टानामस्त्राणां सम्प्रदायः समूहो यस्मै सः, चत्वारि अङ्गानि यस्य तेन चतुरङ्गेन साधनेन सैन्येन अन्वितः युक्तः अनुप्रहितः तस्याश्वस्य पश्चात् प्रेरितः। राज्ञीति शेषः।

"हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयमित्यमरः।

(झ) वासेति। स्निग्धलक्ष्मणनामश्रवणात् स्नेहः, तत्पुत्रः सेनापतिरिति कौतुकं, दृष्टुमशक्यत्वादस्रमिति बोध्यम्। कुमारो बालकः। यं लक्ष्मणं क्षुद्रबालकमिव दृष्टवती, तस्य पुत्रः, स च सेनापतिरिति महत् कौतुकं आश्चर्यञ्चेति भावः।

यथा "मृतमस्मो" त्यादि लौकिकोक्तौ द्वितीयं "भूतमस्मी" ति वाक्यमेव विस्मयव्यञ्जकं तथाऽत्रापि "भ्रातर्जीवामी" ति वाक्यमेव विस्मयव्यञ्जकमिति दिक्। हन्त हर्षे।

(ञ) आव इति। अत्रान्तरे अस्मिन्नवकाशे समय इत्यर्थः। ब्राह्मणेन केनचिदिति शेषः। उत्क्षिप्य उत्तोल्य संस्थाप्येत्यर्थः। उरसो वक्षसस्ताड़नेन सह इति सोरस्ताड़नं वक्षसि कराघातं कृत्वेत्यर्थः। ब्रह्मणे विप्राय हितं ब्रह्मण्यं, न ब्रह्मण्यं अब्रह्मण्यं ब्राह्मणस्याहितं अमङ्गलमित्यर्थः। उद्‌घोषितं उच्चैः शब्दितं अब्रह्मण्यमिति कृत्वा उच्चैः शब्दः कृत इत्यर्थः। ततस्तदनन्तरं। अन्तरेण विना। आत्मदोषं आत्मनः शासनदोषं निरूपयति निर्णयति सति। करुणामये, अन्यर्थां

इत्युपश्रुत्यैव कृपाणपाणिः पुष्पकं विमानमारुह्य सर्वा दिशो विदिशश्च शूद्रतापसान्वेषणाय जगत्पतिः सञ्चरितुमारब्धवान् ।

वास । शम्बूको नाम धमपः शूद्रोऽस्मिन्नेव जनस्थाने तपश्चरति तदपि नाम रामभद्रः पुनरपीदं वनमलङ्कुर्य्यात् । (ठ)

आर्य्ये । भद्रे ! गम्यतेऽधुना ।

अनेककर्टिप्रजिश्वरस्य रामस्य कस्यचित् पुत्रमरणादुद्वेगो न स्यादिति भावः । सहसा तत्क्षणात् । शरीरं शरीराद्युत्पत्तिः सा विद्यते यस्या इति शरीरिणी केनचिदुच्चारिता सा न भवतीत्यशरीरिणी आकाशवाणीत्यर्थः । उदचरत् उत्थिता ।

राजापराधात् प्रजानामुपद्रव उक्तो महाभारते—

" असाधुशासनाद्राज्ञो महाभीतिरुपप्लवः ।
प्रवर्त्तते च नियतमकालस्तुर्रीतयः ॥ "

अशरीरिणीं वाचमाह शम्बूक इति । शम्बूको नाम वृषलः शूद्रः पृथिव्यां तपस्तप्यते चरतीत्यर्थः । हे राम ! ते तव स शम्बूकः शीर्षे मस्तकावच्छेदे च्छेद्यः च्छेदनार्हः तस्य शिरश्छेदः कर्त्तव्य इत्यर्थः अतएव तं हत्वा द्विजं ब्राह्मणपुत्रं जीवय ।

शीर्षच्छेद्य इति दृष्टे यथा गौरितिवदधिकरणे सप्तमी ।

(ट) इत्युपेति । एवकारशब्दः शीघ्रत्वसूचनाय । जगत्पतिः पृथिवीश्वरो रामः कृपाणपाणिः खड्गहस्तः सन् पुष्पकं पुष्पकनामकं विमानं व्योमयानम् । विदिशः अग्न्यादिकोणान् ।

" दिशोर्मध्ये विदिक् स्त्रियाम् " मित्यमरः ।

(ठ) वासेति । धमपो यज्ञीयधूमपानकारी नित्योपवासीत्यर्थः । तत्स्थानात् हेतोः । अलङ्कुर्य्यात् आगमनेन शोभयेत् । प्रथमोऽपिशब्दः प्रश्ने, नामशब्दः सम्भावनायां । अलङ्कुर्य्यादिति सम्भावनां कर्त्तुमर्हामि किमित्यर्थः । द्वितीयोऽपिशब्दः समुच्चये ।

वास । एवमस्तु, कठोरीभूतोऽयं दिवसः । तथाहि (ड)

कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन सम्पातिभि-
र्घर्मस्रंसितबन्धनैः स्वकुसुमैरर्चन्ति गोदावरीम् ।
छायाऽपस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः
कूजत्क्लान्तकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः ॥८॥

(ड) वासेति । कठोरीभूतः दारुणातपसन्तापाद् दुरतिक्रम इत्यर्थः । तथाहि-तमेवार्थं जानीहीत्यर्थः ।

कण्डूलेति । कूले तीरे गोदावर्या इत्यर्थः स्थिता इति शेषः । छायायां अपस्किरमाणः कीटवहिष्करणार्थं तरुषु चञ्चुघातं कुर्वन्तो ये विष्किराः पक्षिणः, तैर्मुखैः करणभूतैः व्याकृष्टा आकृष्य वहिष्कृताः कीटा याभ्यः तास्तथोक्तास्त्वचो वल्कलानि येषां ते तथोक्ताः, तथा कूजन्ति शब्दायमानानि क्लान्तानि आतपतापात् खिन्नानि कपोतकुक्कुटानां कुलानि समूहा येषु ते तथोक्ताः कुलायद्रुमाः नीडवृक्षाः कण्डूलानां कण्डूयनयुक्तानां द्विपगण्डपिण्डानां हस्तिकपोलदेशानां कषणेन घर्षणेन य उत्कम्पः चलनं तेन सम्पातिभिः पतद्भिः तथा घर्म्मेण आतपतापेन स्रंसितानि ध्वस्तानि बन्धनानि वृन्तानि येषां तैः स्वकुसुमैः स्वकीयपुष्पैः गोदावरीं नदीं अर्चन्ति पूजयन्तीव । दारुणातपतापस्यैवायं व्यापार इति भावः ।

अत्र अर्चन्तीत्यत्र इवशब्दाभावात् वृक्षाणाञ्च पूजनायोग्यत्वात् इवशब्दोऽध्याहार्य्य इति प्रतीयमाना भावाभिमानिनी क्रियोत्प्रेक्षाऽलङ्कारः स्वभावोक्तिश्चेत्यनयोरङ्गाङ्गिभावेन सङ्करः। छेकानुप्रासश्च शब्दालङ्कारः ।

"विविष्किरपतत्रयः" "कुलायो नीडमस्त्रिया" मिति चामरः ।

"घर्मः स्यादातपे ग्रीष्मेऽप्युष्णस्वेदाम्भसोरपि" इति मेदिनी ।

अर्चन्तिरयं भौवादिकः । कण्डूरेषामस्तीति कण्डूलाः सिध्मादित्वाल्लच् । अपस्किरमाण इति अपपूर्वात् किरतेः "अपस्किर" इत्यात्मनेपदविधान विषयत्वादात्मनेपदं "अपाच्चतुष्पा" दित्यादिना सुट् ।

शार्दूलविक्रीडितं वृत्तम् ॥ ८ ॥

इति परिक्रम्य निष्क्रान्ते । (ढ)

विष्कम्भकः ॥ (ण)

ततः प्रविशति सदयोद्यतखड्गो रामभद्रः । (त)

रामः । रे हस्त ! दक्षिण ! मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम् ।

(ढ) इतीति । परिक्रम्य इतस्ततः पादविक्षेपं कृत्वा निष्क्रान्ते आत्रेयीवासन्त्याविति शेषः ।

(ण) विष्केति । भूतानां भाविनीनाञ्च घटनानामुपस्थापकः संयोजको वा संक्षिप्तः प्रबन्धो विष्कम्भकः । तथाच साहित्यदर्पणे—

"वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥"

तथाचास्मिन् प्रबन्धे सीतानिर्वासनं कुशलवयोर्जन्म, तयोर्वाल्मीकिसमीपे समर्पणं मित्यार्थत्यादीनामतीतघटनानामुपस्थापनं तथा शम्बूकवधार्थं रामस्य भ्रमणं, शम्बूकवधः, अश्वमेधायोजनमित्यादीनां भविष्यद्घटनानामुपस्थापनं द्रष्टव्यम । स चायं शुद्धो विष्कम्भकः मध्यमाभ्यामात्रेयीवासन्तीभ्यां प्रयोजितत्वात् । यथा साहित्यदर्पणे:——

"मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः ।
शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पितः ॥"

(त) तत इति । सदयं सकरुणं उद्यत उत्तोलितः खड्गो येन सः, वधार्हापराधं विना वधोद्यमात् सदयत्वमुक्तम् ।

रे हस्तेति । रे इत्यवज्ञायसम्बोधनसूचकमव्ययं । अवज्ञा च सीतानिर्वासनकरणादेवेति बोध्यं । रे दक्षिण हस्त ! मृतस्य द्विजस्य शिशोः ब्राह्मणबालकस्य जीवातवे जीवनाय शूद्र एव मुनिस्तस्मिन् कृपाणं खड्गं विसृज निक्षिप, ब्राह्मणशिशुजीवनमेव प्रहारस्य

---

(१) कृतान्तकान्त इति पाठान्तरम् ।

रामस्य गात्रमसि, दुर्वहगर्भखिन्न-
सीताविवासनपटो: (१) करुणा कुतस्ते ? ॥ १०॥

अथ कथञ्चित् प्रहृत्य। कृतं रामसदृशं कर्म्म, अपि जीवेत् स ब्राह्मणशिशुः ?। (थ)

सुव्यसुद्देश्यं नतु शम्बूकहत्येति भावः। ननु प्रहारयोग्यापराधाभावे कथं प्रहरामि इत्येव मां निवारयतीत्याह त्वं रामस्य गात्रं अङ्गमित्यर्थः असि भवसि, तेन किमित्याह दुर्वहो यो गर्भः गर्भभार इत्यर्थः तेन खिन्ना श्रान्ता या सीता तस्या विवासने वनप्रेरणे पटुर्निपुणस्तस्य ति तव कुतः करुणा दया कुतोऽपि नेत्यर्थः। प्रायेण सर्वस्यैव कार्य्यस्य दक्षिणहस्तेन क्रियमाणत्वात् सीतानिर्वासनस्यापि दक्षिणहस्तेनैव कृतत्वोक्तिरुपचारात् सङ्गच्छते। यः पूर्णगर्भभारक्लान्तायाः प्राणप्रियतमायाः सीताया निर्वासनं कृतवान्, तस्य तव निःसम्पर्कसापराधजनप्रहारे दया न सम्भवत्येवेति भावः।

अत्र करुणाभावं प्रति सीताविवासनपटुत्वं हेतुरिति पदार्थहेतुकं काव्यलिङ्ग-मलङ्कारः अर्थापत्तिश्चेत्यनयोरङ्गाङ्गित्वेन सङ्करः।

"जैवातृकस्त्रियां शशी जीविते जीवनौषधे" इति मेदिनी।

ननु "अग्निहोत्रं तपः सत्यं वेदानाञ्चानुपालनम्।
आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते।
इष्टापूर्त्तौ द्विजातीनां धर्म्मः सामान्य इष्यते
अधिकारी भवेच्छूद्रः पूर्त्तधर्म्मे, न वैदिके॥"

इति हारीतवचनात् शूद्रस्य तपश्चरणे अधिकाराभावात् पापमेव, सुतरां अपराधोऽपि मन्तव्य एव किन्तु स न प्राणदण्डार्ह इति, सत्यं, "शम्बूको नाम वृषल" इत्याद्या-काशवाणीविश्वासादेव रामेण शम्बूकस्य प्राणदण्डः कृतो न तु शास्त्रत इति दिक्। वसन्ततिलकावृत्तम् ॥ १० ॥

(थ) अथेति। अथ अनन्तरम्। कथञ्चित् कष्टेनेत्यर्थः, प्रहारायोग्ये अपराधिनि

---

(१) सीताप्रवासनपटोरिति पाठान्तरम्।

प्रविश्य दिव्यपुरुषः । जयति जयति देवः । (क)

दत्ताभये त्वयि यमादपि दण्डधारे
सञ्जीवितः शिशुरयं मम चेयमृद्धिः ।
शम्बूक एष शिरसा चरणौ नतस्ते
सत्सङ्गजानि निधनान्यपि तारयन्ति ॥ ११ ॥

प्रहारकरणे दुःखमेव स्यादिति कवेरभिप्रायः । रामसदृशं रामोचितं । येन निरपराधायाः सीतायाः निर्वासनेन हत्या कृता तस्य अतिनृशंसस्य रामस्य निरपराधशम्बूकहत्याकरणं योग्यमेव अनुरूपत्वादिति भावः । गर्भेरयिशादार्धपौक्तिरियं । अपिशब्दः प्रश्ने ।

(क) प्रविश्येति । दिव्यपुरुषः स्वर्गीयाकृतिविशिष्टः कश्चित् पुरुष इत्यर्थः । दत्तेति । यमादपि दत्तं अभयं येन तादृशे भगवन्नारायणावतारतया यमभयनिवारक इत्यर्थः । देवयोनिविशेषः शम्बूको रामं नारायणावतारत्वेन जानातीति तस्य ईदृशोक्तिः सङ्गच्छत इति भाव्यं । त्वयि रामचन्द्रे दण्डधारे दण्डधारिणि सति अयं शिशुः सञ्जीवितः, मम च इयं दिव्याकृतिलाभरूपा ऋद्धिः अभ्युदयः । अतएव एष शम्बूकः शिरसा ते तव चरणौ नतः नमस्करोतीत्यर्थः । ननु दण्डविधानात् कथमृद्धिः स्यादित्याह सत्सङ्गजानि सतां संसर्गादुत्पन्नानि निधनान्यपि मरणान्यपि तारयन्ति "सद्भिः सन्निकर्षोऽपि क्षणार्द्धमपि शस्यते" इत्युक्तेः पापादुद्धारयन्तीत्यर्थः ।

अत्र दण्डरूपकारणात् ऋद्धिरूपविरुद्धफलोत्पत्तेर्विषमालङ्कारः, तथा ऋद्धिरूपविशेषस्य सत्सङ्गजातनिधनकृततारणरूपसामान्येन समर्थनात् अर्थान्तरन्यासस्य अनयोः संसृष्टिः ।

राजदण्डस्य पापनाशकत्वमभ्युदयहेतुत्वाञ्चाह मनुः—

"राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः ।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ॥

वसन्ततिलका वृत्तं ॥ ११ ॥

रामः। इयमपि प्रियं नः तदनुभूयतामुग्रस्य तपसः परिपाकः। (ध)

यत्रानन्दाश्च मोदाश्च यत्र पुण्याश्च (१) सम्पदः।
वैराजा नाम ते लोकास्तैजसाः सन्तु ते ध्रुवाः (२) ॥१२॥

शम्बूकः। युष्मत्पादप्रसादोपाय एष महिमा, किमत्र तपसा (३)। अथवा महदुपकृतं तपसा। (न)

(ध) राम इति। इयमपि ब्राह्मणशिशोर्जीवनं तव च दिव्यदेहप्राप्तिः एतद्द्वयमपीत्यर्थः। यद्यपि ब्राह्मणशिशोर्जीवनमेव हत्यायां मुख्यमुद्देश्यमासीत् तथापि प्रसङ्गसिद्धा निशम्बूकस्य दिव्यदेहप्राप्तिः प्रीतिजनिकैव सतां पराभ्युदयदर्शनेन प्रीतेरेव सम्भवादिति भावः। तत् तस्मात्। उग्रस्य दारुणस्य दुष्करस्येत्यर्थः। परिपाकः फलम्। शूद्रस्यैव तपस्यनधिकारः, किन्तु देवयोनिविशेषस्य शम्बूकस्य तपस्यधिकार आसीदेव सुतरां तस्य फलमपि सम्भवत्येवेति बोध्यम्।

किन्तत् फलमित्याह यत्रेति। यत्र येषु लोकेषु आनन्दाः ब्रह्मप्रीतयः, मोदा नानाविधसम्भोगाः, यत्र येषु च पुण्याः पवित्रा नतु मर्त्यवत् दुर्व्यवहारादिना कलुषिताः सम्पदः धनजनादिसम्पत्तयः सन्तीति शेषः। विराजो ब्रह्मण इमे इति वैराजा ब्रह्मसम्बन्धिनः नाम्ना च वैराजाः तैजसाः आलोकमयास्ते लोका ब्रह्मलोका इत्यर्थः ते तव ध्रुवा नित्या अचया इति यावत् सन्तु भवन्तु। त्वं चिरमेव ब्रह्मलोके तिष्ठेत्यर्थः। एतदेव तव तपसः फलं, नत्वयमाशीर्वादो वरो वेति भावः ॥१२॥

(न) शम्बूक इति। युष्माकं पादस्य चरणस्य प्रसादः अनुग्रह एव उपायः कारणं यस्य स तथोक्तः, एष मम ब्रह्मलोकलाभरूपः महिमा माहात्म्यम्। अतः महिम्नि विषये तपसा किं कृतमित्यर्थः। ममेयं ब्रह्मलोकप्राप्तिसम्भावना तवानुग्रहादेव नतु तपसेत्यर्थः।

---

(१) पुण्याभिसम्भवाः इति क्वापि पाठः। (२) शिवा इति पाठभेदः। (३) नतु तपसः फलमिति पाठान्तरम्।

अन्वेष्टव्यो यदसि भुवने भूतनाथः शरण्यो
मामन्विष्यन्निह वृषलकं योजनानां शतानि ।
क्रान्त्वा प्राप्तः, स इह तपसां (१) सम्प्रसादोऽन्यथा चेत्
क्वायोध्यायाः पुनरुपगमो दण्डकायां वने वः ? ॥१३॥

रामः । किं नाम दण्डकेयम् ? । सर्वतोऽवलोक्य । आं । (प)

तपसा कृतं महान्तमुपकारमाह अन्वेष्टव्य इति । भुवने जगति भूतानां प्राणिनां नाथः पतिः तथा शरणेषु रक्षकेषु साधुः शरण्यः रक्षकश्रेष्ठ इत्यर्थः अतएव अन्वेष्टव्यः सर्वेषां साक्षात्कर्त्तव्यस्त्वं वृषलकं कुत्सितशूद्रं मां अन्विष्यन् विचिन्वन् सन् योजनानां शतानि क्रान्त्वा विलङ्घ्य इह अस्मिन् महारण्ये यत् प्राप्तोऽसि, स तवागमः तपसां मत्कृतानामित्यर्थः सम्प्रसादः अनुग्रहः अनुग्रहजन्य इत्यर्थः । चेत् यदि अन्यथा तपःकृतानुग्रहजन्यो न स्यादित्यर्थः तदा अयोध्याया निजराजधान्याः सकाशात् दण्डकायां वने दण्डकारण्ये वो युष्माकं क्व कस्मिन् निमित्ते पुनः द्वितीयवारं हेतुं विनेत्यर्थः उपगम आगमनं भवेदिति शेषः कथमपि नेत्यर्थः ।

अत्र 'विपुलेन सागरशयस्य कुक्षिणे'त्यादिसाहित्यदर्पणोदाहरणवत् एकस्मिन् रामे अन्वेषणकर्मत्वकर्त्तृत्वयोर्विरूपयोः सङ्घटनाद्विषमालङ्कारः, तथा वधोद्देशजनितरामगमने तपोऽनुग्रहजन्यत्वमध्यवसितमिति भेदे अभेदाध्यवसायरूपा अतिशयोक्तिश्चेत्यनयोः संसृष्टिः ।

'शरणं गृहरक्षित्रो'रित्यमरः ।

शरण्य इति साध्वर्थे यप्रत्ययः । वृषलकमिति कुत्सार्थे कप्रत्ययः ।

'दण्डकायां वने' इति "अम्बिका कलत्र"मित्यादिवदुभयोरप्यजहल्लिङ्गत्वात् लिङ्गवैषम्येऽपि विशेष्यविशेषणता ।

मन्दाक्रान्ता वृत्तं ॥१३॥

(प) राम इति । आं शब्दो निश्चये, दण्डकैवेयमित्यर्थः ।

---

(१) तपसः इति पाठभेदः ।

स्निग्धश्यामाः क्वचिदपरतो भीषणाभोगरूक्षाः
स्थाने स्थाने मुखरककुभो झाङ्कृतैर्निर्झराणाम्। (१)
एतेतीर्थाश्रमगिरिसरिद्गर्त्तकान्तारमिश्राः (२)
संदृश्यन्ते परिचितभुवो दण्डकारण्यभागाः ॥ १४ ॥

"झां झानिलि शब्दन्तो"रिति मेदिनी।

स्निग्धेति। क्वचित् कस्मिंश्चिद्विभागे स्निग्धाः नवपत्रपल्लवशालित्वात् तैलाक्ता इव, श्यामा श्यामलाश्च, तथा अपरतः अन्यस्मिन् विभागे भीषणो यः आभोगः परिपूर्णता विस्तीर्णतेति यावत् तेन रूक्षाः कर्कशाः, स्थाने स्थाने पदे पदे निर्झराणां पार्वत्य-प्रस्रवणानां झाङ्कृतैः झानितिशब्दैः मुखराः शब्दायमानाः ककुभो दिशो येषु ते, तीर्थानि मुनिगणसेवितजलानि, आश्रमाः मुनीनां तपोवनानि, गिरयः पर्वताः, सरितो नद्यः, गर्त्ताः बिलानि, कान्ताराः दुर्गमाः पन्थानः तैर्मिश्रा युक्ताः परिचिताः पूर्वं ज्ञाताः भुवः स्थानानि येषु ते, एते सम्मुखवर्त्तिनः दण्डकारण्यभागाः दण्डकारण्यस्य प्रदेशाः संदृश्यन्ते अवलोक्यन्ते।

अत्र स्वभावोक्तिरलङ्कारः। भयानको रसः।

"आभोगः परिपूर्णता" "दिशस्तु ककुभः काष्ठाः"। निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ। महारण्ये दुर्गपथे कान्तारः पुंनपुंसकमिति चामरः।

इक्ष्वाकुराजपुत्रो दण्डनामा शुक्राचार्य्यकन्यां अरजानाम्नीं बलेन धर्षितवान्, शुक्राचार्य्यस्तच्छ्रुत्वा 'अद्यावधि सप्ताहमध्ये तव राज्यं स्थावरजङ्गमात्मकं सर्वमेव नाशं प्राप्स्यति, त्वञ्च मरिष्यसी'ति शशाप तन्निकटवर्त्तिनो जनानवोचत् 'सत्वरं यूयमस्मात् राज्यादपसृत्य तिष्ठते'ति ततश्च दण्डराज्यं अरण्यतया परिणतं, जनाश्च तस्माद्देशादपसृत्य स्थिताः तेन दण्डराज्यं दण्डकारण्यं, तेषां जनानां निवासस्थानञ्च जनस्थानमित्युच्यते इति रामायणवार्त्ताऽत्रानुसन्धेया। मन्दाक्रान्ता वृत्तं ॥१४॥

(१) झाङ्कैः, झाङ्कृतैरिति पाठान्तरद्वयम्।
(२) गर्भकान्तारमिश्रा इति पाठान्तरम्।

शम्बू। दण्डकैवेयं, अत्र किल निवसता देवेन (फ)

चतुर्द्दशसहस्राणि रक्षसां भीमकर्म्मणाम् ।

त्रयश्च दूषणखरत्रिमूर्द्धानो रणे हताः (१) ॥ १५ ॥

येन सिद्धक्षेत्रे ऽस्मिन् जनस्थाने माहशानामपि भीरुजानपदानामकुतोभयः (२) सञ्चारो जातः । (ब)

रामः । न केवलं दण्डकेयं, (३) जनस्थानमपि ? (भ)

शम्बू। बाढ़ं, एतानि सर्वभूतलोमहर्षणान्युन्मत्तचण्डश्वापदकुलसङ्कुलगिरिगह्वराणि जनस्थानपर्य्यन्तानि दीर्घारण्यानि दक्षिणां दिशमभिवर्त्तन्ते (म)। तथाहि

(फ) शम्बू इति । देवेन भवतेत्यर्थः ।

चतुरिति । भीमं भयङ्करं कर्म्म हिंसादिकं येषां तेषां रक्षसां राक्षसानां चतुर्दशसहस्राणि तथा तेषां नेता दूषणः खरः त्रिमूर्द्धा त्रिशिराः एते त्रयश्च रणे हताः व्यापादिताः ।

त्रयो मूर्द्धानो यस्येति विग्रहे द्वित्रिभ्यां मूर्द्धन् इति समासान्तात् अत् प्रत्ययेन त्रिमूर्द्ध इत्येवं प्रयोगः स्यात् तथा च भट्टी-रघुतनयमुपाययौ त्रिमूर्द्ध इति सुतरामत्र च्युतसंस्कारतादोषः, स च त्रिमूर्द्धाः समरे हता इति पाठेन समाधेयः ।

पथ्यावक्त्रं वृत्तं ॥१५॥

(ब) येनेति । येन दूषणखरादिराक्षसवधेन । सिद्धानां ऋषिमादिसिद्धानां क्षेत्रे स्थाने । न विद्यते कुतोऽपि भयं यस्मिन् सः अकुतोभयः, सञ्चारो गमनागमनं ।

(भ) राम इति । अपिशब्दः प्रश्ने । सीतासमेतपर्य्यटनस्थानदर्शनेन गभीरविषादोक्तिरियं रामस्य ।

(म) शम्बू इति । बाढ़ं सत्यं, दण्डकैवेयं जनस्थानञ्चेदमिति स्वीकरोमीत्यर्थः

---

(१) निपातिता इति क्वापि पाठः । (२) भीरुजनानामिति पाठभेदः । (३) न केवलं दण्डका, किन्तु न केवलं दण्डकैव, न केवलं दण्डकारण्यमिति पाठान्तरम् ।

निष्कूजस्तिमिताः क्वचित् क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः
स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः।
सीमानः प्रदरोदरेषु विलसत् स्वल्पाम्भसो यास्वयं
तृष्यद्भिः प्रतिसूर्य्यकैरजगरस्वेदद्रवः पीयते ॥ १६ ॥

भ्रशप्रतिज्ञयोर्वाढमिति दान्तनानार्थेऽमरः प्रतिज्ञा अङ्गीकार इति तट्टीका च। सर्वेषां भूतानां प्राणिनां लोमहर्षणानि भयेन रोमाञ्चजनकानि, तथा उन्मत्तानि चित्तप्रायाणि चण्डानि अत्यन्तक्रुद्धानि च यानि श्वापदकुलानि व्याघ्रादिहिंस्रजन्तुगणाः तैः सङ्कुलानि व्याप्तानि गिरिगह्वराणि पर्वतगुहा येषु तानि, जनस्थानं पर्य्यन्तः सीमा येषां तानि। अभि लक्ष्यीकृत्य वर्त्तन्ते दक्षिणदिग्लम्बमानानीत्यर्थः।

निष्कूजेति। क्वचित् कस्मिंश्चित् भागे निष्कूजाः हिंस्रसञ्चारात् पक्ष्यादीनामपि शब्दरहिताः, अतएव स्तिमिताः निश्चलाः, तथा क्वचिदपि भागे प्रोच्चण्डाः भयङ्कराः सत्त्वानां जन्तूनां स्वनाः शब्दा यासु ताः, क्वचिञ्च स्वेच्छया नतु केनाप्युपद्रवेण क्लान्ततयेत्यर्थः सुप्ता निद्रिता ये गभीरभोगा विशालशरीरा भुजगाः सर्पाः तेषां श्वासेन निश्वासवायुना प्रदीप्तोऽग्निर्यासु ताः, प्रदराणां विदीर्णभूमिगर्त्तानां उदरेषु मध्येषु विलसत् प्रकाशमानं स्वल्पं अम्भो जलं यासां ताः सीमानः भागविशेषाः वर्त्तन्ते इति शेषः। यासु सीमसु तृष्यद्भिः पिपासुभिः प्रतिसूर्य्यकैः कृकलासैः अजगराणां सुप्तवृहत्सर्पाणां अयं दृश्यमानः स्वेदद्रवः घर्म्मजलं पीयते। सुतरां लोमहर्षणमिदं वनमिति भावः।

अत्र स्वभावोक्तिरलङ्कारः। गभीरशब्दस्य निम्नार्थे शक्तत्वात् अत्र तु विशालार्थ लक्षणया प्रयोगात् तस्याश्च लक्षणाया रूढिप्रयोजनाभावात् नेयार्थत्वदोषः, स च विशालभोगेति पाठेन समाधेयः।

निष्कूजस्तिमिता इत्यनेन हिंस्रजन्तुसञ्चारो व्यज्यत इति वस्तुना वस्तुध्वनिः।

उग्रस्त्वत्यन्तकोपनः द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु। भोगः सुखे

राम:। पश्यामि च जनस्थानं भूतपूर्वखरालयम् ।
प्रत्यक्षानिव (१) वृत्तान्तान् पूर्वाननुभवामि च ॥१७॥

सर्वतोऽवलोक्य। सर्वथा प्रियारामा हि वैदेह्यासीत्, एतानि तानि नाम कान्ताराणि, किमत: परं भयानकं स्यात्। (य)

स्त्र्यादिभ्रतावहेय कृषकायशी:। दरीऽस्त्रियां भयेश्वभ्रं इति चामर:। प्रतिसूर्य्यक: कृकलास:। अजगर: स्वनामख्यातवृहत्सर्प इति च शब्दकल्पद्रुम:।

शार्दूलविक्रीडितं वृत्तम् ॥१६॥

पश्यामीति। भूतपूर्व: खरस्य तदाख्यराक्षसस्य आलयो निवासो यस्मिन् तत्, तथोक्तं जनस्थानं पश्यामि च पूर्व्वानतीतान् वृत्तान्तान् खरदूषणादिभि: सह युद्धादिघटनावलीरित्यर्थ: प्रत्यक्षानिव अनुभवामि च। दर्शनसमय एव अतीतघटनावलीनां प्रत्यक्षवदनुभव इत्यर्थ:।

अत्र पश्यामि अनुभवामीति क्रियासमुच्चयोऽयमलङ्कार:, तथा अतीतघटनानां प्रत्यक्षायमाणत्वात् भाविकालङ्कारश्च त्वनयो रङ्गाङ्गिभावेन सङ्कर:। तथाच साहित्यदर्पण:

अद्भुतस्य पदार्थस्य भूतस्याथ भविष्यत:।
यत् प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतं ॥

केचित्तु प्रत्यक्षत्वीत् प्रेक्षा इति वदन्ति।

पूर्वं भूत इति भूतपूर्व: षष्ठ्यन्ताद्भूतपूर्वाभिधेये रूप्यइति ज्ञापकात् भूतशब्दस्य पूर्वनिपात: ॥१७॥

(य) सर्वेति। सर्वत: समन्तत: सर्वासु दिक्षु इत्यर्थ: समन्ततस्तु। परित: सर्वतो विष्वगित्यपीत्यमर:। अत्रारामपदेन वनभावसन्निर्पितं तेन प्रिय: प्रीतिकर आरामो वनं यस्या: सा। हिशब्दोऽवधारणे। एतानि दृश्यमानानि, तानि येषु पूर्वं सीतया सह पर्य्यटितं तानीत्यर्थ:, कान्ताराणि महारण्यानि। अत एकाकिनो मम वनदर्शनात् परं किं वस्तु भयानकं दारुणदु:खकरत्वेन भयङ्करं स्यात् अपि तु किमपि नेत्यर्थ:। येषु वनेषु सीतया सह महामोदेन भ्रमणं कृतवान् अद्य तेष्वेव वनेषु सीतां विना केवलमहं भ्रमामीति महादु:खकरमेतदिति भाव:।

(१) प्रत्यक्षमिवेति पाठान्तरं।

शाखा । त्वया सह निवत्स्यामि वनेषु मधुगन्धिषु ।

इति हा रमतैवासौ (१) स्नेहस्तस्याः स तादृशः ॥१८॥

अकिञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।

तत्तस्य किमपि द्रव्यं योहि यस्य प्रियो जनः ॥ १९ ॥

त्वयेति । त्वया राघेण सह मधुना पुष्परसेन गन्ध इति मधुगन्धः स एषां अस्तीति मधुगन्धीनि तेषु, प्रस्फुटितनानाकुसुमशालिष्वित्यर्थः वनेषु निवत्स्यामि, स्थास्यामि, न तु त्वां विना राजधान्यामपि स्थातुमिच्छामीति भावः । इति एवं उक्तेति शेषः सीता अरमत आनन्दं प्रकाशितवती । हा इति शोकसूचकमव्ययं । स सत्यः सीतायाः स्नेहः स इव सीतायाः स्नेह इव दृश्यत इति तादृश आसीदिति शेषः । सीतास्नेहः सीतास्नेह इवासीदित्यर्थः ।

अत्र एकस्यैव स्नेहस्य उपमानोपमेयत्वकल्पनात् अनन्वयोऽलङ्कारः ।

उपमानोपमेयत्वमेकस्यैवत्वनन्वय इति साहित्यदर्पणात् ।

तेन तत् स्नेहस्यासाधारणत्वं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥१८॥

अकिञ्चिदिति । अकिञ्चिदपि कुर्वाणः दुःखनाशोपायं न कुर्वाणोऽपीत्यर्थः प्रियो जनः, सौख्यैः अवलोकनालापादिजनिताभिरविच्छिन्नसुखधाराभिरित्यर्थः दुःखानि संसारकाशान् अपोहति नाशयति । कथमेतत् सम्भवतीत्याह, हि यस्मात् यो जनो यस्य प्रियः तत् स जन इत्यर्थः तस्य किमपि अनिर्वचनीयं अमूल्यं वा द्रव्यं धनं सुतरां तादृशजनलाभेनैव दुःखनाशः सम्भवति, सीता च ममैवं प्रियजन आसीदिति भावः ।

अत्र अप्रस्तुतात् प्रियजनसामान्यात् प्रस्तुतस्य सीतारूपविशेषप्रियजनस्य प्रतीतेरप्रस्तुतप्रशंसाऽलङ्कारः, तथा किञ्चिदकरणेऽपि दुःखनाशोत्पत्तेर्विभावना, सा च सौख्यैरित्युक्तरूक्तनिमित्ता, तथा दुःखनाशं प्रति प्रियजनस्य अमूल्यधनत्वं हेतुरिति कारणेन

---

(१) इति च रमते वासौ, इति हा रमते सीता, इतीवारमतीव सौ इति पाठान्तराणि ।

अम्बू। तदलमेभिर्दुरासदैः। अथैतानि मदकलमयूरकण्ठ-कोमलच्छविभिरवकीर्णानि पर्य्यन्तै (१) रविरलनिविष्ट-नील-बहल-च्छाय-तरुषण्डमण्डितानि असम्भ्रान्तविविधमृगयूथानि पश्यतु महानुभावः प्रशान्तगम्भीराणि मध्यमारण्यकानि। (२)

कार्य्यसमर्थनरूपोऽर्थान्तरन्यासः, तथा प्रियोजनः किमपि द्रव्यमिति निरङ्गं केवलं रूपकमित्येतेषामङ्गाङ्गित्वेन सङ्करः। तथा कुर्वाण इत्यनेन सम्बन्धयोग्यस्य नञः किञ्चिदित्येनेन योगात् अभवन्मतमसम्बन्धदोषः स च किञ्चिदपि न कुर्वाण इति पाठेन समाधेयः।

द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वस्वित्यमरः।

सुखानां कर्म्माणि (दर्शनादीनि) इति गुणवचनब्राह्मणादिभ्य इत्यादिना ष्यञ् इति सौख्यानि। तदिति य आधारस्तदधिकरणमितिवत् द्रव्यमित्यस्य विशेषणत्वेन नपुंसकं ॥१९॥

(२) अम्बूइति। भीषणवनदर्शनजनितोयं रामस्य विषाद इति स्वीयेण कोमलवनदर्शनेन तं विषादमपनेतुमाह तदलमित्यादि। दुःखेन आसद्यते चक्षुषा स्पृश्यत इति दुरासदानि तैरेभिर्वनैरलं विषादभीतिवर्द्धकतया एषां वनानां वर्णनं दर्शनञ्च निष्प्रयोजनमित्यर्थः। अथेति वाक्यान्तरारम्भे। महानुभावो महाप्रभावो भवान् एतानि अग्रवर्त्तीनि, मदकला अव्यक्तशब्दकारिणो ये मयूराः तेषां कण्ठानामिव कोमला स्निग्धा छविः कान्तिर्येषां तैः, पर्य्यन्तैः परिसरैः शेषभागैरिति यावत् अवकीर्णानि विच्छिन्नानि वेष्टितानीत्यर्थः, तथा अविरलं अनवकाशं घनमिति यावत् यथा तथा निविष्टाः स्थिता अतएव नीला श्यामला, बहला गाढ़ा च छाया येषां ते तथोक्ता ये तरुणा नवीनास्तरुषण्डा वृक्षसमूहास्तैर्मण्डितानि, तथा असम्भ्रान्तं भयाभावात् अचकितं विविधानां नानाप्रकाराणां मृगाणां हरिणानां यूथं समूहो येषु तानि, तथा प्रशान्तानि

---

(१) पर्वतैरिति क्वापि पाठः।

इह समदशकुन्ताक्रान्तवानीरवीरुत्-
प्रसवसुरभिशीतस्वच्छतोया वहन्ति ।
फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः ॥ २० ॥

अपि च (ल) दधति कुहरभाजामत्र भल्लूकयूना-
मनुरसितगुरूणि स्त्यानमम्बूकृतानि ।

सौम्यानि च तानि गम्भीराणि दूरवगाहानि घनानि चेति, तानि, मध्यमारण्यकानि मध्यवर्त्तीनि वनानि पश्यतु । शान्तस्निग्धवस्तुदर्शनेन मनसः प्रफुल्लता स्यादिति वक्तुरभिप्रायः ।

'मदकलः । अव्यक्तप्रलापी' 'वह्लः । दृढे'; इति च शब्दकल्पद्रुमः । यद्यपि 'कदम्बे षण्डमस्त्रियाम्' इत्यमरेण पद्मादिसमूह एव षण्डशब्दस्य शक्तिरभिहिता, तथापि प्राणिसमूहवाचकमण्डशब्दस्य "इंको व्यघ्नन्मण्डस्य" इत्यत्राप्राणिसमूहेऽपि प्रयोगवत् अजहत्स्वार्थलक्षणया तरुषण्डेत्यत्रापि सामान्यसमूहेऽपि षण्डशब्दस्य प्रयोगः ।

इहेति । इह मध्यमारण्ये समदैः मत्तैः, शकुन्तैः पक्षिभिः, आक्रान्तानां उड्डीय आश्रितानां वानीरवीरुधां वेतसलतानां प्रसवैः पुष्पैः सुरभीणि सुगन्धानि, शीतानि स्वभावशीतलानि स्वच्छानि अतिवनिर्मलानि तोयानि जलानि यासां तास्तथोक्ताः । तथा फलभराणां फलसमूहानां परिणामेन पक्वतया श्यामाः श्यामवर्णा ये जम्बूनिकुञ्जा घनीभूतजम्बूवृक्षाः छादितदेशा इत्यर्थः, तेषु स्खलनेन प्रतिघातेन मुखराणि शब्दायमानानि भूरीणि प्रचुराणि स्रोतांसि प्रवाहा यासां ता तथोक्ता निर्झरिण्यो नद्यो वहन्ति प्रवहन्ति ।

अत्र स्वभावोक्तिरलङ्कारः । मालिनी वृत्तम् ॥२०॥

(ल) अपि चेति । अन्यच्च वक्तव्यमस्तीति शेषः ।

दधतीति । अत्र मध्यमारण्ये कुहरभाजां गिरिगह्वरवासिनां भल्लूकयूनां तरुणभल्लूकानां अनुरसितेन प्रतिध्वनिना गुरूणि वर्द्धितानीत्यर्थः अम्बूकृतानि ष्ठीवनसशब्दाः युत-

शिशिरकटुकषायः स्त्यायते शल्लकीना-
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥ २१ ॥

रामः । सबाष्पस्तम्भम् । भद्र ! शिवास्ते पन्थानः ,देवयानं प्रतिपद्यस्व पुण्येभ्यो लोकेभ्यः । (ब)

कारशब्दा इति यावत् घुत्कारस्तु भल्लूकानां स्वभावः स्वनं वृद्धिं दधति धारयन्ति घुत्कारशब्दा इदन्तः श्रूयन्त इत्यर्थः । शल्लकीनां लताविशेषाणां शिशिरः शीतलः कटुः कटुरसः कषायः सुरभिश्च इभैर्हस्तिभिः दलिता मर्द्दिताः अतएव विकीर्णा इतस्ततो विक्षिप्ता ये ग्रन्थयः संयुक्तदेशास्तेषां निष्यन्दस्य निर्य्यासरसस्य गन्धः स्त्यायते वर्द्धते हस्तिमदगन्धप्रसारादिति भावः ।

अत्र भल्लूकानां वृद्धिं प्रति मधुरस्निग्धत्वं हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ।

यौवने बलाधिक्यात् ध्वनेर्दीर्घत्वसूचनाय भल्लूकयूनामिति युवशब्दप्रयोगः ।

"भल्लूकं सनिष्ठेव" मित्यमरः । "कटुतिक्तकषायास्तु सौरभे च प्रकीर्त्तिता" इति हलायुधः । घण्टकं शल्लकीलतायामित्यमरकोषटीका । श्लोकद्वयमिदमविकलं महावीरचरिते मालतीमाधवे च दृश्यते ।

मालिनी वृत्तम् ॥२१॥

(ब) राम इति । बाष्पस्तम्भेन अश्रुनिरोधेन सहेति सबाष्पस्तम्भम् आहेतिक्रिया-विशेषणम् । शम्बूकरूपे अश्रुपतने अविदितवृत्तान्तकशम्बूकस्य जिज्ञासा स्यात् तत्कथने च धैर्य्यापगमेन लाघवं स्यादिति कवेर्भावः ।

पन्थानो गमनमार्गाः शिवा मङ्गलकराः सन्त्विति शेषः । निर्विघ्नं तव गमनमस्त्वित्यर्थः । पुण्येभ्यो लोकेभ्यः पवित्रस्थानेभ्यः ब्रह्मलोकेभ्य इत्यर्थः गन्तुमिति शेषः, देवयानं देवविमानं प्रतिपद्यस्व लभस्व इत्याशीर्वादः । त्वं गन्तुमर्हसीति भङ्गान्तरेण गमनाय अनुमोदनम् । देवयानं देवविमानमिति शब्दकल्पद्रुमः ।

शम्बू। यावत् पुराणब्रह्मवादिनमगस्त्यमृषिमभिवाद्य शाश्वतं पदमनुप्रविशामि । इति निष्क्रान्तः । (श)

राम:। एतत्तदेव हि वनं पुनरद्य दृष्टं
यस्मिन्नभूम चिरमेव पुरा वसन्तः ।

(श) शम्बिति । पुराणब्रह्मवादिनं प्राचीनं वेदवक्तारं वेदाध्यापकमित्यर्थः अभिवाद्य यावत् प्रणिपत्य वेत्यर्थः यावच्छब्दोऽयमवधारणे । शाश्वतं पदं नित्यं स्थानं ब्रह्मलोकं अनुप्रविशामि गच्छामि । अगस्त्यसदृशमहापुरुषप्रणामस्य महाफलजनकत्वात् समीपवर्तित्वेन सुलभं तं प्रणामं कः परित्यजतीति भावः । अत्र ब्रह्मलोकस्य नित्यत्वं ततः पतनराहित्यरूपं बोध्यम् तथा च देवीपुराणम्

सत्यस्तु सप्तमो लोको ह्यपुनर्भववासिनाम् ।
ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः ॥

एतदिति । अद्य तदेव एतद्वनं पुनर्दृष्टं, वनवासकाले प्रथमं एतत् द्वितीयवारं दृष्टमित्यर्थः । हिशब्दः पादपूरणे । यस्मिन् वने पुरा वनवासकाले चिरमेव बहुकालमेव वसन्तस्तिष्ठन्तो वयं सीतारामलक्ष्मणाः स्वधर्मे स्वयोरारण्यकगृहस्थयोधर्मे आचारे रताः वन्यफलमूलादिभोजनवल्कलपरिधानादयो वानप्रस्थधर्माः अतिथिसत्कारादयो गृहस्थधर्मास्तेषु आसक्ताः सन्त आरण्यका वानप्रस्थाश्रमिणः, गृहिणो गृहस्थाः, सांसारिकेषु संसारिभोग्येषु सुखेषु च अङ्गनालिङ्गनभुजबलातमस्याभवादिषु रसज्ञाः आस्वादानुभवकारिणश्च अभूम भूतवन्तः स्मः । एकस्याः सीताया अभावेन तेषां किमपि सम्प्रति नास्तीति भावः । ·

अत्र वनवासरूपं कार्यं कुर्वतां रामादीनां गृहस्थवादिकार्यकरणं दैवादिति गृहिणी सचिवः सखीमिथ इति साहित्यदर्पणोदाहृतवत् विशेषालङ्कारः । तथाच साहित्यदर्पणः—

आरण्यकाश्च गृहिणश्च रताः स्वधर्मे
सांसारिकेषु च सुखेषु वयं रसज्ञाः ॥२२॥

अपि च (ख) एते त एव गिरयो विरुवन्मयूरा-
स्तान्येव मत्तहरिणानि वनस्थलानि ।

यद्वाधेयमनाधारमेकस्यानेकगोचरम्
किञ्चित् प्रकुर्वतः कार्य्यमशक्यस्येतरस्य वा ।
कार्य्यस्य करणं दैवाद्विशेषस्त्रिविधस्ततः ॥

पादपूरणमात्रप्रयोजनेन हिशब्दप्रयोगात् निरर्थकत्वदोषः, स च एतत्तदेव विपिनं पुनरद्य दृष्टमिति पाठात् समाधेयः ।

वानप्रस्थगृहस्थधर्म्मावुक्तौ गरुड़पुराणे । यथा—
भूमौ मूलफलाशित्वं स्वाध्यायस्तप एव च ।
संविभागो यथान्यायं धर्म्मोऽयं वनवासिनः ॥ इत्यादिः
पञ्चभिश्च महायज्ञैः श्रद्दधानो यजेद्दिह ।
देवतातिथिशिष्टाशी नियतो वेदकर्म्मसु । इत्यादिः ।
आस्वादे च रसं प्राहुरिति शब्दार्णवः ॥२२॥

(ख) अपि च अन्यच्चेत्यर्थः, ब्रवीमीति शेषः ।

एत इति । विरुवन्तः शब्दायमाना मयूरा येषु ते, एते दृश्यमानाः त एव पूर्वदृष्टा एव गिरयः पर्वताः, तथा मत्ता हर्षदृप्ता हरिणा येषु तानि, तान्येव पूर्वदृष्टान्येव वनस्थलानि । आमञ्जवः अतिमनोहरा वञ्जुला अशोकवृक्षा लताश्च येषु तानि, तथा नीरन्ध्रा निरवकाशा घनाः नीलाः श्यामलाश्च निचुला वेतसा येषु तानि पूर्वदृष्टानि अमूनि दृश्यमानानि सरित्तटानि नदीतीराणि । सर्व्वत्र सन्तीति क्रियान्वयः ।

अत्रैषाम तुल्ययोगितालङ्कारः । न चात्र सन्तीत्यनुक्त्या न्यूनपदत्वदोष इति वाच्यं कर्मधारयादिभिरक्तोऽध्याहारादौ तद्दोषस्यानङ्गीकारात् ।

आमञ्जुवञ्जुललतानि च तान्यमूनि
नीरन्ध्रनील (१) निचुलानि सरित्तटानि ॥ २३ ॥
मेघमालेव यश्चायमारादपि विभाव्यते
गिरिः प्रस्रवणः सोऽयं यत्र गोदावरी नदी ॥ २४ ॥
अस्यैवासीन्महति शिखरे गृध्रराजस्य वास-
स्तस्याधस्ताद्वयमपि रतास्तेषु पर्णोटजेषु ।

वञ्जुलो वञ्जुलोऽशोके इत्यमरः । वानीरे कविभेदे स्यान्निचुलः स्थलवेतस इति शब्दार्णवः ।

पूर्वश्लोके अत्र च वसन्ततिलकावृत्तम् ॥२३॥

मेघेति । अयं यः मेघमालेव आरादपि दूरादपि विभाव्यते पर्वतत्वेन बुध्यते । सोऽयं प्रस्रवणो नाम गिरिः पर्वतो विद्यत इति शेषः । यत्र पर्वते गोदावरी नदी अस्तीति शेषः । यस्य पाददेशे प्रवहतीत्यर्थः ।

अत्रोपमाऽलङ्कारः । नचात्र मेघमालेति स्त्रीलिङ्गत्वात् मुखेव धवलचन्द्र इत्यादिव दुष्प्रक्रमत्वदोष इति वाच्यं यत्र लिङ्गवचनभेदेऽपि न साधारणधर्मस्यान्यथाभावस्तत्र न दोषः । यथा मुखं चन्द्र इवाभातीति दर्पणकारोक्तेः सुस्थत्वात् ।

आराद्दूरसमीपयोरित्यमरः ॥२४॥

अस्येति । अस्यैव प्रस्रवणस्य महति शिखरे विशाले शृङ्गे गृध्रराजस्य पक्षिश्रेष्ठस्य जटायुष इत्यर्थः वास आसीत्, तस्य शृङ्गस्य अधस्तात् निम्नदेशे नीचस्थितेष्वित्यर्थः तेषु पूर्वाश्रितेषु पर्णोटजेषु पत्रनिर्मितकुटीरेषु वयमपि सीतारामलक्ष्मणाः रताः आसक्ताः स्थिता इति यावत् । यत्र निम्नदेशे गोदावर्या नद्याः पयसि जले विनतानां अवनतानां जलपर्यन्तपतितानामित्यर्थः श्यामलानां श्यामवर्णानां वनोकहानां

(१) मंप इति पाठभेदः ।

गोदावर्य्याः पयसि विततश्यामलानोकहश्री-(१)
रन्तः कूजन् मुखरशकुनो यत्र रम्यो वनान्तः ॥ २५ ॥

आ, तदत्रैव सा पञ्चवटी, यत्रातिचिरनिवासेन विविधविस्रम्भातिप्रसङ्गसाक्षिणः प्रदेशाः, प्रियायाः प्रियसखी च वासन्ती नाम वनदेवता प्रतिवसति, तत् किमिदमापतितमद्य रामस्य ? (२) सम्प्रति हि (स)

हृद्यार्था श्रीः शोभा यस्मिन् स तथोक्तः, तथा मुखराः शब्दायमानाः शकुनाः पक्षिणो यत्र सः अतएव अन्तर्मध्ये कूजन् शब्दं कुर्वन्निव स्थितः, रम्यो मनोहरः वनान्तः वनस्वरूपं वनमिति यावत्, विद्यत इति शेषः।

अत्र प्राणिकर्त्तव्यस्य कूजनस्य वनेन कर्त्तुमशक्यत्वात् कूजन्निवेत्यर्थोवाच्यः तेन भावाभिमानिनो प्रतीयमाना क्रियोत्प्रेक्षालङ्कारः।

"गृध्रराजः। जटायुपक्षी"ति शब्दकल्पद्रुमः। 'अनोकहः कुठः सालः पलाशी द्रुद्रुमागमाः।' "अन्तः स्वरूपे नाशे ना" इति चामरः।

मन्दाक्रान्ता वृत्तम् ॥२५॥

(स) आ इति। आ इति स्मरणसूचकमव्ययम्। अत्रैव देशे। यत्र पञ्चवट्यां अतिचिरनिवासेन अतिदीर्घकालावस्थानेन। एकत्र दीर्घकालावस्थानेन हि तत्स्थानस्यावस्था सम्यक् परिज्ञाता स्यात् सुतरां तत्र विस्रम्भातिप्रसङ्गस्य सम्भव इति भावः। विस्रम्भेन फलमूलाद्याहरणार्थं लक्ष्मणेन बहुकालिकं दूरप्रस्थानं कृतं अन्यस्याप्यागमनासम्भवेन दर्शनासम्भव इति विश्वासेन, ये अतिप्रसङ्गाः स्वच्छन्दप्रेमालापविहारादीनामत्यन्तप्रसक्तयः प्रचुरसम्बन्धा इति यावत् ते विस्रम्भातिप्रसङ्गाः। विविधानां नानाप्रकाराणां विस्रम्भातिप्रसङ्गानां साक्षिणो द्रष्टारः प्रदेशाः स्थानानि सन्तीति शेषः। तत् तस्मात् अद्य रामस्य इदं किं आपतितं उपस्थितं सीतया सह पूर्वदृष्टानां एतेषां अद्य तां

(१) विततं इति पाठान्तरम्। (२) रामहतकस्येति क्वापि पाठः।

चिरोद्वेगारम्भी (१) प्रसृत इव तीव्रो विषरसः
कुतश्चित् संवेगान्निहित इव (२) शल्यस्य शकलः ।
व्रणो रूढग्रन्थिः स्फुटित इव हृन्मर्मणि पुन-
र्घनीभूतः शोको विकलयति सम्मूर्च्छयति च (३) ॥२६॥

तथापि पूर्वसुहृदो भूमिभागान् पश्यामि । निरूप्य । अहो ! अनवस्थितो भूमिसन्निवेशः । तथाहि । (छ)

विना एकाकिनी मम दर्शनं महादुःखकारणमिति भावः । तत् दुःखं प्रकाशयति सम्प्रति हीत्यादिना । हि तथाहि ।

आ प्रगृह्यं स्मृतौ वाक्ये । समौ विश्रम्भविश्वासौ इति चामरः ।

चिरोद्वेगेति । चिरं बहुकालस्थायिनं उद्वेगं हृदयोद्वेजनं मनोयन्त्रणामिति-यावत् आरभते उत्पादयतीति चिरोद्वेगारम्भी तीव्रः अत्युग्रो विषरसः विषद्रवः प्रसृत इव, तथा शल्यस्य शङ्कोः शकलः खण्डः कुतश्चित् अनिर्वचनीयात् सम्वेगात् निहित इव हृदये निखात इव, तथा हृन्मर्मणि हृदयमध्यदेशे रूढग्रन्थिः उत्पन्नसन्धिः बद्धमूल इति यावत् व्रणः स्फोटकः स्फुटितः विदीर्ण इव, शोकः अतीतसीतास्मृतिः पुनर्घनी-भूतः सन्, कालेन विलीनप्रायोऽपि उद्दीपकतत्तत्स्थानदर्शनादिना सान्द्रतां प्राप्तः सन् विकलयति व्याकुलीकरोति सम्मूर्च्छयति मोहं प्रापयति च मामिति शेषः ।

अत्र तिसृणां क्रियोत्प्रेक्षाणां मिथो नैरपेक्ष्येण संसृष्टिः तथा विकलयति, सम्मूर्च्छयतीत्यनेकक्रिययोः शोक इत्येककर्तृकत्वात् दीपकस्यालङ्कारः ।

गुणे रागे द्रवे रसः । वा पुंसि शल्यं शङ्कुर्ना इति चामरः ।

शिखरिणीवृत्तम् ॥२६॥

(छ) ननु शोकोद्दीपकत्वादेतेषां दर्शनं न क्रियतामित्याह तथापीति । यद्यपि

---

(१) चिराद्वेगारम्भी पाठान्तरम् (२) चलित इव, प्रचल इव इति पाठभेदौ ।
(३) नूतन इव इति क्वापि पाठः ।

पुरा यत्र स्रोतः, पुलिनमधुना तत्र सरितां,
विपर्य्यासं यातो घनविरलभावः क्षितिरुहाम् ।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढ़यति ॥ २७ ॥

एतेषां दर्शनं शोकोद्दीपकं तथापीत्यर्थः । पूर्वसुहृदः सुहृदः इव पुरा प्रियाचरणकारिण इत्यर्थः । निरूप्य सर्वतोविशेषेणावलोक्य । अहोशब्दः आश्चर्य्ये । भूमिसन्निवेशः अस्य स्थानस्यावस्था अनवस्थितः पूर्व्वतो वैषम्यं प्राप्तः । वैषम्यं समर्थयति तथाहीति ।

पुरेति । पुरा सीतया सहावस्थानकाले यत्र सरितां नदीनां स्रोतः प्रवाहः आसीदिति शेषः, अधुना तत्र स्थाने पुलिनं जलादुत्थितं वालुकामयं तटं जातमिति शेषः । तथा क्षितिरुहां वृक्षाणां घनविरलभावः विपर्य्यासं वैपरीत्यं यातः । यत्र वृक्षा घना आसन् तत्र विरला जाताः, यत्र च विरला आसन् तत्र घना जाता इत्यर्थः । अतएव बहोः कालात् प्रभूतसमयात् परमिति शेषः दृष्टं इदं वनं अपरमिव तद्भिन्नं वनमिव मन्ये अनुभवामि । ननु तदेवेदं वनमिति निश्चये को हेतुरित्याह । शैलानां प्रस्रवणादिपर्व्वतानां निवेशः अवस्थानं इदं तत् वनमिति बुद्धिं द्रढ़यति दृढां करोति निश्चयज्ञानं जनयति । तद्वनस्यादानमन्यथा भवेऽपि पूर्व्वदृष्टशैलानामनन्यथाभावात् तदेवैतत् वनमिति मम निश्चय इति भावः । इदन्त्वावच्छिन्नपक्षकं तद्वनत्वसाध्यकं पूर्व्वदृष्टतत्शैलदर्शनसाधनकं ममेदमनुमानमभ्रान्तं हेत्वाभासाभावादिति वा भावः ।

अत्र अपरवनवत् ज्ञानं प्रति पूर्व्वार्द्धवाक्यद्वयं हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः, तथा मुखमेणीदृशो भाति पूर्णचन्द्र इवापर इति साहित्यदर्पणोदाहृतवत् भावाभिमानिना वाच्या उत्प्रेक्षा, तथा तदलङ्कारकतावच्छिन्नविषयात् तत्तच्छैलदर्शनरूपसाधनात् तद्वनत्वप्रकारकज्ञानरूपसाध्योपपत्त्या अनुमानालङ्कारश्च इत्येतेषामङ्गाङ्गिभावेन सङ्करः ।

तातोत्थितं तत् पुलिनं । प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु इति चामरः । बहुशब्दो द्विविधः, संख्यावाचकः प्रचुरवाचकश्च, तत्र संख्यावाचकात् नित्यं बहुवचनं

हन्त ! परिहरन्तमपि मामितः पञ्चवटीस्नेहो बलादपकर्षतीव। सकरुणम्। (घ)

यस्यां ते दिवसास्तया सह मया नीता यथा (१)स्वे गृहे
यत्सम्बन्धिकथाभिरेव सततं दीर्घाभिरास्थीयत।
एकः सम्प्रति नाशितप्रियतमस्तामद्य रामः कथं
पापः पञ्चवटीं विलोकयतु वा, गच्छत्वसम्भाव्य वा ?॥२८॥

स्यात्, प्रभु[र]र्थवाचकात्, एकवचनमपि ; तेन वह्नीति प्रयोगः साधुः। न्यायकुसुमाञ्जलावपि किं बहुना, यं कारवोऽपि विश्वकर्मेत्युपासते इत्याद्यन्यत्रापि एकवचनं दृश्यते शिखरिणी वृत्तम् ॥२७॥

(घ) हन्तेति। हन्त खेदे। परिहरन्तमपि परित्यजन्तमपि, पञ्चवटीं विहाय गच्छन्तमपीत्यर्थः। अपकर्षतीव परावर्त्तयतीव इति क्रियोत्प्रेक्षा। स्वैरविहारस्थलत्वात् इमां विहाय गन्तुं नेच्छा भवतीति भावः। सकरुणं सशोकम्।

यस्यामिति। यस्यां पञ्चवट्यां स्वे गृहे यथा, स्वकीयराजधान्यामिव मया तया सीतया सह ते वनवासकालीना दिवसा नीता अतिवाहिताः, तथा दीर्घाभिः घटनानां बाहुल्येन विस्तृताभिः यत्सम्बन्धिकथाभिः यत्पञ्चवटीविषयकालापैरेव नत्वन्यकथोपकथनैरित्यर्थः सततं आस्थीयते स्थितं अयोध्यायां मया सीतया चेति शेषः। सम्प्रति नाशिता निर्वासनेन विनाशं प्रापिता प्रियतमा सीता येन स तथोक्तः, अतएव पापः पापात्मा एको रामः अद्य तां पञ्चवटीं कथं केन प्रकारेण वा विलोकयतु दारुणशोकेन विदीर्णहृदयत्वादेकस्य मम पञ्चवटीदर्शनमसम्भवमेवेति भावः। तथा असम्भाव्य अवस्थानेन असमादृत्य कथं वा गच्छतु, या किल तदानीमावयोः परमसुखहेतुरासीत्, कियत्कालं स्थानेनापि तां पञ्चवटीमसमादृत्य गमनं नितान्तमनौचित्यजनकमिति महाव्याकुलोऽस्मि सम्वृत्त इति भावः।

अत्र प्रथमपादे श्रौती उपमा, तथा च राजधान्यामिव पञ्चवट्यां सुखसञ्चार

---

(१) पुनरिति पाठान्तरम्।

प्रविश्य शम्बूकः । जयति देवः । देव! भगवानगस्त्यो मत्तः श्रुतभवत्सन्निधानस्त्वामाह, परिकल्पितविमानावतरणमङ्गला प्रतीक्षते वत्सला लोपामुद्रा सर्वे च (१) महर्षयस्तदेहि, सम्भावयास्मान्; अथ प्रजविना पुष्पकेण स्वदेशमुपसङ्क्रम्याश्वमेधाय सज्जो भविष्यसीति । (क)

रामः । यथाज्ञापयति भगवान् (ख)

शम्बूकः । इतस्तर्हि देवः प्रवर्त्तयतु पुष्पकम् । (ग)

आसीदिति वस्तु व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः, तथा पापित्वं प्रति नाश्रितप्रियतमत्वं हेतुरिति पदार्थहेतुकं काव्यलिङ्गञ्च अनयोः परस्परनैरपेक्ष्येण स्थितेः संसृष्टिः ॥ शार्दूलविक्रीडितं वृत्तम् ॥ २८ ॥

(क) प्रविश्येति । मत्तः मत्, मम मुखादित्यर्थः श्रुतं भवतः सन्निधानं येन सः । परिकल्पितानि आयोजितानि विमानावतरणमङ्गलानि विमानादवतरणकालोचित-मङ्गलमूलकधान्यदूर्वादीनि यया सा । वत्सला त्वां प्रति स्नेहवती । प्रतीक्षते तव दर्शनायावतिष्ठते । महर्षयश्च प्रतीक्षन्ते इत्यर्थः । तत्तस्मात् तव दर्शनाय तेषामाग्रहातिशयादित्यर्थः । अस्मान् सम्भावय आगमनेन समाद्रियताम् । अथ अस्मात् सम्भावनानन्तरं प्रजविना महावेगवता । अस्माकं सम्भावनायां यावत् कालक्षयो भवेत् पुष्पकस्य किञ्चिदधिकवेगस्थापनेन स पूर्णो भवेदिति भावः । सज्ज उद्युक्तः । इति प्रस्तुतं स्यादित्यर्थः ।

(ख) राम इति । भगवानगस्त्यो यथाज्ञापयति तथैव करोमीत्यर्थः ।

(ग) शम्बूक इति । तर्हि अगस्त्याज्ञानुरूपकर्त्तव्यत्वे सति इतः अस्मिन् पथि, पुष्पकं विमानं प्रवर्त्तयतु चालयत्वित्यर्थः ।

---

(१) आगस्त्यायन इति पाठभेदः ।

रामः। भगवति! पञ्चवटि! गुरुजनानुरोधात् क्षम्यतामतिक्रमो रामस्य। (घ)

शम्बू। देव! पश्य पश्य।

कूजत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचक- (१)
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतोऽयं गिरिः।

(घ) राम इति। नानामुनिजननिवासात् महामाहात्म्यातिशयेन पञ्चवट्याः भगवतीति सम्बोधनम्। माहात्म्यवतीति तदर्थः। अतिक्रमः सम्भावनया अकरणं, क्षम्यतां सह्यतां। अगस्त्यादेशादेवायमतिक्रमो नतु स्वेच्छात इति भावः।

कूजदिति। कुञ्जं लतायाच्छादितस्थानमेव कुटीरं क्षुद्रगृहं तत्र स्थिताः कौशिकघटाः पेचकसमूहाः। कूजन्तीनां शब्दायमानानां कुञ्जकुटीरकौशिकघटानां यो घुत्कारः 'घुत्' इत्येवं शब्दः तद्विशिष्टाः ये कीचकस्तम्बाः वंशगुच्छाः (बाँशझाड़) तेषां आडम्बरेण उच्चरवेण मूकं भयेन निःशब्दं मौकुलिकुलं काकसमूहो यस्मिन् सः तथोक्तः, अयं क्रौञ्चा (क्रौञ्चवकी) अस्यास्तीति क्रौञ्चावान् स एवेति प्रज्ञादित्वात् स्वार्थेऽण् क्रौञ्चावतो नाम गिरिः पर्वतो विद्यत इति शेषः। कुञ्जे तिष्ठन्तः पेचका रुवन्ति, वंशस्तम्बप्रतिहततत्प्रतिध्वनिश्रवणेन भीताः काका यत्र निःशब्दास्तिष्ठन्तीति निष्कर्षः। एतस्मिन् गिरौ प्रचलतामितस्ततो भ्रमतां प्रचलाकिनां मयूराणां कूजितैः उद्वेजिताः भीताः सन्तः कुम्भीनसाः क्रूरसर्पाः पुराणचन्दनतरुस्कन्धेषु जीर्णचन्दनवृक्षाणां प्रकाण्डदेशेषु शाखोद्गमस्थानेष्विति यावत् उच्छ्वसन्ति पलायनार्थं उत्तिष्ठन्ति। नानाविधजन्तुनिवासोऽयं गिरिरिति भावः।

अत्र कुञ्जकुटीरेत्यत्र निरङ्गं केवलं रूपकं, तथा मानवगतमूकत्वं वर्णात्मकशब्दराहित्यं पशुपक्ष्यादिगतमूकत्वञ्च ध्वन्यात्मकशब्दराहित्यं; किन्तु एकमूकशब्देन तयोरभेदाध्यवसायात् "विश्वं षट्खादिव वह्नमीन" मिति साहित्यदर्पणोदाहृतवत् अतिशयोक्तिः, प्रधानालङ्कारस्य स्वभावोक्तिरित्येतेषां अङ्गाङ्गिभावेन सङ्करः। वृत्त्यनुप्रासश्च शब्दालङ्कारः।

(१) गुञ्जत्कुञ्ज इति क्वापि पाठः।

एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितै-
रुद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु (१) कुम्भीनसाः ॥ २८ ॥

अपि च (क)

एते ते कुहरेषु गद्गदनदद्गोदावरीवारयो-
मेघालम्बितमौलिनीलशिखराः (२) क्षोणीभृतो दक्षिणाः ।

"कुटीरं चटवेश्म स्यात्" इति जटाधरः । "मयेन्द्रगुणगुल्गुलुकव्यालयाहिषु कौशिकः ।" "वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः" इति चामरः ! "मौकुलिः काकः" इति शब्दकल्पद्रुमः । "आडम्बरस्तु दर्पे स्यात् शब्दे तूर्यस्वनेऽपि च" इति रत्नकोषः । "प्रचलाकिसितापाङ्गशिखावलगतव्रता" इति त्रिकाण्डशेषः "कुम्भीनसः क्रूरसर्पे स्त्रियां लवणमातरि" इति मेदिनी ।

एतद्गतानेकप्रचलितशब्दप्रयोगात् गम्भीरचिन्तया बहुना कालेन नितान्तकष्टेन च प्रसूतोऽयं श्लोक इत्यनुमीयते ।

शार्दूलविक्रीडितं वृत्तम् ॥ २८ ॥

(क) । अपि च अन्यच्च वर्णात इति शेषः । इत्यादावपिः समुच्चये ।

एत इति । कुहरेषु गुहासु गद्गदं तादृगव्यक्तशब्दं यथास्यात्तथा नदन्ति शब्दायमानानि गोदावर्या नद्या वारीणि जलानि येषु ते, तथोक्ताः, तथा मेघैरालम्बिता आश्रिता मौलयो मस्तकानि येषां ते, अतएव नीलानि शिखराणि येषां ते, नाना-धातुभिर्विचित्रशृङ्गा अपि प्रधानतो मेघवर्णपातात् नीलवर्णत्वेन प्रतीयमानशृङ्गा इत्यर्थः ते प्रसिद्धा एते दृश्यमाना दक्षिणाः भारतवर्षस्य दक्षिणदिग्वर्त्तिनः क्षौणीभृतः पर्वताः विद्यन्त इति शेषः । अन्योऽन्यं परस्परं यः प्रतिघात आघातस्तेन सङ्कुलं उच्छृङ्खलं यथास्यात्तथा चलन्तो ये कल्लोला महातरङ्गास्तेषां कोलाहलैः सङ्कीर्णशब्दैः

---

(१) रोहिणतरुस्कन्धेष्विति पाठान्तरम् । (२) मेघाकुल···इति पाठभेदः ।

अन्योऽन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलै-
रुत्तालास्त इमे गभीरपयसः पुण्याः सरित्सङ्गमाः ॥ ३० ॥

इति निष्क्रान्ताः सर्वे । (च)

इति वज्रवटी प्रवेशोनाम
द्वितीयोऽङ्कः (छ)

उत्तालाः करालाः भीषणा इति यावत् गभीरपयसः अगाधसलिलाः, पुण्याः पवित्राः, ते प्रसिद्धाः, इमे दृश्यमानाः, सरित्सङ्गमाः नदीसंयोगाः संयुक्तनद्य इत्यर्थः विद्यन्त इति शेषः ।

अत्र शृङ्गाणां स्वकीयमानावर्णपरित्यागेन मेघावलम्बितमौलित्वनिबन्धननीलगुण-ग्रहणात् तद्गुणालङ्कारः । तथा " वरं वारं गैः " 'कीर्णौ कण्ठौ' च सकृत्साम्यात् छेकानुप्रासः, तथा प्रथमे पादे दकाराणां, द्वितीये लकाराणां तृतीयेऽपि च लकाराणामसकृत् साम्यात् वृत्त्यनुप्रासश्च, इत्येतेषां संसृष्टिः । उत्ताला इत्यस्य लकारस्य तृतीयपादगतलकारसम्बन्धेन वृत्त्यनुप्रासघटकत्वं तेन च चतु-र्थपादस्यापि स्पर्शात् न-'पतत्प्रकर्षता' दोषः ।

" मौलिः । मस्तकं " इति शब्दकल्पद्रुमः । " उत्तालः उत्कटे श्रेष्ठे शिकराशी प्लवङ्गमे " इति मेदिनी ।

" भावविहितः कृत्प्रत्ययो द्रव्यवत्प्रकाशते " इति न्यायात् सरित्सङ्गमा इत्यनेन संयुक्तनद्य इति प्रतीयते ।

शार्दूलविक्रीडितं वृत्तम् ॥३० ॥

(च) इतीति । रामस्य पुष्पकविमानपरिचालकाः केचित् किङ्करा आसन् ते तु तत्रोपस्थिता एवेति तैः सह कौलितयो रामलक्ष्मणयोर्मिलितत्वात् 'निष्क्रान्ताः सर्वे'

इति बहुवचनं सर्वशब्दसङ्गतिरिति। केचित्तु कवेः नारायणावतारत्वेन रामस्य ज्ञानेन गुरुत्वात् बहुवचनमिति वदन्ति, तदसत् सर्वशब्दानर्थकास्य तादवस्थ्यात्।

(ख) इतीति। नाम, पञ्चवटीप्रवेश इति नाम्नः प्रकाश्यः; द्वितीयोऽङ्कः समाप्त इति शेषः।

"नाम कोपेऽभ्युपगमे विस्मये स्मरणेऽपि च।
सम्भाव्यकुत्साप्राकाम्यविकल्पेषु च दृश्यते॥"

इति मेदिनी।

इति श्रीहरिदाससिद्धान्तवागीशविरचितायामुत्तररामचरित-
टीकायां सर्वार्थबोधिनीसमाख्यायां द्वितीयाङ्क-
विवरणं समाप्तम्॥ ० ॥

——:o:——

तृतीयोऽङ्कः।

—ः०ः—

ततः प्रविशति नदीद्वयं तमसा मुरला च। (क)

तमसा। सखि! मुरले! किमसि सम्भ्रान्तेव? । (ख)

मुरला। भगवति! तमसे! प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुं, जानास्येव यथा वधूत्यागात् प्रभृति—(ग)

अनिर्भिन्नो गभीरत्वा- (१) दन्तर्गूढघनव्यथः।

(क) तत इति। नद्योर्द्वयं नद्यधिष्ठातृदेवताद्वयं, जलप्रवाहस्यैव नदीत्वेन रङ्गालये तत्प्रवेशासम्भवात्।

(ख) तमसेति। किं कथं सम्भ्रान्तेव चकितेव अस्थिरमना इवेति यावत्।

(ग) मुरलेति। भगवति! माहात्म्यवति! तमसायास्तीर्थत्वेनेदृक् सम्बोधनं सरिद्वरां नदीश्रेष्ठां। वधूत्यागात्प्रभृति, भार्यायाः सीताया निर्वासनादवधि।

"वधूर्भार्या स्नुषा स्त्री च" इत्यमरः।

प्रभृतीति श्लोकस्थस्य इत्यतः परमस्तीत्यध्याहृतं त्यायाः क्रियाया विशेषणम्।

अनिर्भिन्न इति। गभीरत्वात् गाम्भीर्यात् धैर्यातिशयादित्यर्थः, पक्षे गाढलेपवत्त्वादित्यर्थः, अनिर्भिन्नः अप्रकाशितः अन्यैरज्ञात इति यावत् पक्षे अविदीर्णः अतएव अन्तः हृदये, गूढा सम्वृता, घना निविडा गाढा इति यावत् व्यथा वेदना यस्य स तथोक्तः, प्रकाशमानः शोको नाधिकं पीडयतीति भावः। पक्षे अन्तर्मध्ये गूढा गुप्ता घना

---

(१) अनिर्भिन्नगभीरत्वादिति क्वचित् पाठः।

पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥ १ ॥

तेन च तथाविधेष्टजनकष्टपातजन्मना प्रकर्षगतेन दीर्घशोकसन्तानेन सम्प्रत्यतितरां (१) परिक्षीणो रामभद्रः, तमवलोक्य कम्पितमिव मे हृदयम्, अधुना च प्रतिनिवर्त्तमानेन

गाढ़ा व्यथा तापो यस्य सः । पुटे पत्रादिनिर्म्मिताधारविशेषे पाकः पचनं यस्य सः पुटपाकः पारदाद्यौषधं स प्रतीकाश उपमा यस्य स तथोक्तः रामस्य करुणो रसः सीताविरहजनितशोक इत्यर्थः । अस्तीति शेषः । रामः सीतां स्वयं निर्वास्य तच्छोकं विवरीतुमपि न शक्नोति तेनासह्ययन्त्रणामनुभवतीत्यर्थः ।

अत्र पूर्णोपमाऽलङ्कारः । 'करुणो रस' इत्यभिधानात् रसस्य स्वशब्दोक्तिदोषः "रसस्योक्तिः स्वशब्देन" इति साहित्यदर्पणात् ; स तु 'दशा रामस्य दारुणा' इति पाठेन समाधेयः ।

"स्युरुत्तरपदे त्वमी ।
निभसङ्काशनीकाशप्रतीकाशोपमादयः" इत्यमरः ।

पुटपाक उक्तो भावप्रकाशे—

"पुटपाकस्य पाकोऽयं लेपस्याङ्गारवर्णता ।
लेपञ्च द्व्यङ्गुलं स्थूलं कुर्य्याद्द्व्यङ्गुलिमात्रकम् ।
काश्मीरवटजम्बादिपत्रैर्वेष्टनमुत्तमम् ।
पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत्" इत्यादि ॥ १ ॥

(ख) तेनेति । किञ्चेति चार्थः । तेन पुटपाकप्रतीकाशेन, तथाविधस्तादृशः निर्वासनोत्पन्न इत्यर्थः, य इष्टजनस्य वल्लभजनस्य सीतायाः कष्टपातः दुःखोपस्थितिः तस्माज्जन्म यस्य तेन, सीताया निर्वासनकृतमरणजनितेनेत्यर्थः, प्रकर्षगतेन प्रकृष्टं वृद्धिं प्राप्तेनेत्यर्थः, दीर्घशोकसन्तानेन बहुकालव्यापिनिरवच्छिन्नशोकपरम्परया ।

(१) नितरां इति पाठान्तरम् ।

रामभद्रेण नियतमेव पञ्चवटीवने वधूसहनिवासविस्रम्भसाक्षिणः प्रदेशा द्रष्टव्याः, तेषु च निसर्गधीरस्याप्येवंविधायामवस्थायामतिगम्भीराभोगशोकक्षोभसंवेगात् पदे पदे महान्ति प्रमादस्थानानि शङ्कनीयानि रामभद्रस्य, तद्भगवति ! गोदावरि ! तत्र त्वया सावधानया भवितव्यम्। (घ)

वीचीवातैः शीकरक्षोदशीतैराकर्षद्भिः पद्मकिञ्जल्कगन्धान्।

अतितरां नितान्तं, परिक्षीणः कृशशरीरः सञ्जातः। तं रामभद्रं अवलोक्य स्थितायाः इति शेषः, मे मम लोपामुद्रायाः हृदयं कम्पितमिव दारुणरोगोत्पत्त्यादिशङ्कया विचलितमिव। प्रतिनिवर्त्तमानेन अगस्त्याश्रमात् गतेन, नियतमेव निश्चितमेव। वध्वा भार्य्यया सीतया सहनिवासे एकत्रावस्थाने ये विस्रम्भाः विश्वासाः स्वच्छन्दविहारादि-विश्वस्तव्यवहारा इत्यर्थः, तेषां साक्षिणो द्रष्टारः, प्रदेशाः स्थानानि, द्रष्टव्याः द्रक्ष्यन्त इत्यवश्यं सम्भाव्यत इति भावः। ननु द्रष्टव्याः सन्तु, तेन किमित्याह ; तेषु च प्रदेशेषु निसर्गधीरस्यापि, अचञ्चलचेतसः का कथा स्वाभाविकधैर्य्यसम्पन्नस्यापि रामभद्रस्य एवंविधायामवस्थायां सीताविरहेण एकाकिभ्रमणरूपायां दशायां। अतिगम्भीरः अनन्तत्वात् दुष्प्रापः आभोगः सीमा यस्य सः, असीम इत्यर्थः यः शोकः, तेन यः क्षोभः उद्वेलनं अधीरतेति यावत् तस्य संवेगात् प्रतिघातात्, पदे पदे स्थाने स्थाने, महान्ति अशेषाणि, प्रमादस्थानानि अनवधानताविषयाः मूर्च्छाप्राप्त्यादय इत्यर्थः शङ्कनीयानि आशङ्कन्ते अस्माभिरिति शेषः। तस्मात् रामभद्रस्यानर्थघटनायाः सम्भावनासत्त्वादित्यर्थः। तत्र तेषु रामस्य भ्रमणस्थानेष्वित्यर्थः। सावधानया रामस्य विपन्निवारणविषये एकाग्रचित्तया, भवितव्यं भूयेत।

ननु जलरूपया मया सावधानया सत्यापि किं कर्त्तव्यमित्याह वीचीति। शीकरक्षोदेन जलबिन्दुचूर्णेन शीतैः शीतलैः तथा पद्मकिञ्जल्कगन्धानाकर्षद्भिः आकृष्य वहद्भिरित्यर्थः, तथा स्वैरं स्वैरं प्रेषितैः मन्दं मन्दं प्रेरितैः, शैत्यं सौगन्ध्यं मान्द्यञ्चेति

मोहे मोहे रामभद्रस्य जीवं स्वैरं स्वैरं प्रेषितैस्तर्पयेति ॥२॥

तम। उचितमेव दाक्षिण्यं स्नेहस्य, सञ्जीवनोपायस्तु मौलिक एव रामभद्रस्याद्य सन्निहितः । (ङ)

मुर। कथमिव ? । (च)

तम। श्रूयताम, पुरा किल वाल्मीकितपोवनोपकण्ठात्

वायोर्गुणत्रयं तेन गुणत्रयैर्व विशिष्टैरिति भावः दीचीवातैः स्वकीयतरङ्गवायुभिः मोहे मोहे सकलमूर्च्छितावस्थायां जीवं जीवनं तर्पय प्रीणय, यदा यदैव रामस्य मूर्च्छा भवेत्, तदा तदैव तादृशैस्तरङ्गवायुभिस्तस्य चैतन्यं प्रतिपादयेत्यर्थः। इति इत्यन्तं गोदावरीमभिधातुं प्रेषितास्मीति पूर्वेणान्वयः।

अत्र चैतन्योत्पादनं प्रति वायोः शीतलत्वमेव कारणत्वेनापेक्षितं किन्तु सौगन्ध्य-मान्द्ययोरपि विशेषकारणान्तरयोरुपादानात् गुणयौगपद्याच्च समुच्चयालङ्कारः।

शीकरोऽम्बुकणः स्मृतः। चूर्णं चोदः। मन्दस्वच्छन्दयोः स्वैरमिति चामरः। वीची इति इतश्च क्तिवर्जितादिति वाचिशब्दाद प्रत्ययः।

शालिनी वृत्तम् ॥२॥

(ङ) तमेति। दाक्षिण्यं औदार्यं औदार्यंमानुकूल्यमित्यर्थः। रामं प्रति परमस्नेहवती लोपामुद्रा तदानुकूल्यं कर्त्तुमिच्छति, कुरुतां ; किन्तु तस्याद्य विशेष-प्रयोजनं नास्तीति भावः। कुत इत्याह, तु किन्तु मौलिक एव नतु कृत्रिम इत्यर्थः; रामभद्रस्य सञ्जीवनोपायः चैतन्यप्रतिपादनहेतुः सन्निहितः निकटवर्त्ती स्थितः। सन्निहिता सीता, सैव सञ्जीवयिष्यतीति भावः।

(च) मुरेति। कथमिव, कीदृशः सञ्जीवनोपायः सन्निहित इत्यर्थः।

(छ) तमेति। किलेति पूर्ववृत्तान्तसूचकमव्ययम्। उपकण्ठात् निकटात्। परित्यज्य सीतामिति शेषः। प्राप्ता उपस्थिता प्रसववेदना यस्याः सा, अतएव अतिदुःख-संवेगात् नितान्तकष्टप्रतिघातात् आत्मानं स्वदेहम्। तदैव निक्षिप्तवतीव, तत्र

परित्यज्य गते लक्ष्मणे सीतादेवी प्राप्तप्रसववेदना आत्मानमति-दुःखसंवेगाद्गङ्गाप्रवाहे निक्षिप्तवती, तदैव तत्र दारकद्वयं प्रसूता, भगवतीभ्यां पृथ्वीभागीरथीभ्यामभ्युपपन्ना रसातलञ्च नीता, स्तन्यत्यागात् परेण च तद्दारकद्वयं तस्याः प्राचेतसस्य महर्षे-र्गङ्गादेवी स्वयमर्पितवती । (छ)

सुर । सविस्मयम् ।

ईदृशानां विपाकोऽपि जायते परमाद्भुतः । (१)

गङ्गाप्रवाहे दारकद्वयं बालकयुगलं, प्रसूता प्रसूतवती । पृथ्वी-भागीरथीभ्यां पृथिवी गङ्गाभ्यां अभ्युपपन्ना प्राप्ता गृहीता सतीत्यर्थः रसातलं पातालं नीता बालकाभ्यां सह सीतेति शेषः । स्तन्यस्य दुग्धस्य त्यागो यस्मिन् वयसि तत् स्तन्यत्यागं वयः तस्मात् परेण वर्षद्वयवयसः परमित्यर्थः । तस्याः सीतायाः तद्दारकद्वयम् । महर्षेः प्राचेतसस्य वाल्मीकेः समीपे इत्यर्थः । गङ्गादेवी स्वयं आत्मना, नत्वन्यद्वारेत्यर्थः । एतेन बालका-द्वयं प्रति गङ्गाया आग्रहातिशयः सूच्यते ।

वार्त्ता सम्भाव्ययोः स्मृतं । आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च । दारकौ बालभेदकावित्यमरः ।

प्रसूतेति आदिकर्म्मणि कर्त्तरि क्तः । परेणेति तृतीयाप्रवर्गे । प्राचेतसस्येति सामीप्य-सम्बन्धे षष्ठी, दारकद्वये गङ्गायाः स्वत्वाभावेन तद्धंसाभावात् न चतुर्थी ।

ईदृशानामिति । ईदृशानां सीतारामतुल्यतत्कार्यपरिचितानां जनानां विपाकोऽपि सम्पदि का कथा विपदपि, परमाद्भुतो जायते । कथमित्याह यत्र विपादो एवं विधः पृथिवीगङ्गातुल्यजनः उपकरणीभावम् साहाय्यकारकत्वं आयाति प्राप्नोति । चिरारा-धनयापि ययोः सन्दर्शनं न घटते, ते एव पृथिवीगङ्गे स्वयमेव साहाय्यं कुरुत इति विपाकस्य परमाद्भुतत्वमेवेति भावः ।

---

(१) पावनाद्भुत इति पाठान्तरं ।

यत्रोपकरणीभावमायात्येवं विधो जनः ॥ २ ॥

तम। इदानीन्तु शम्बूकवृत्तान्तेनानेन सम्भावितजनस्थानागमनं रामभद्रं सरयूमुखादुपश्रुत्य भगवती भागीरथी यदेव भगवत्या लोपामुद्रया स्नेहादाशङ्कितं, तदेवाशङ्क्य सीतासमेता केनचिदिव गृहाचारव्यपदेशेन गोदावरीं विलोकयितुमागता । (ज)

मुर। सुविचिन्तितं भगवत्या, राजधानीस्थितस्य खलु तैस्तैर्जगतामाभ्युदयिकैः कार्य्यैर्व्याप्तस्य नियताश्चित्तविक्षेपाः ;

अत्र परमाङ्गुतत्वं प्रति पराद्धवाक्यार्थौ हेतुरिति काव्यलिङ्गमलङ्कारः ।

विपाकः । दुर्गतिः । उपकरणं प्रधानाङ्गीभूतोपकारकद्रव्यम् । इति च शब्द-कल्पद्रुमः ॥२॥

(ज) तमेति । भगवती भागीरथी गङ्गा, अनेन अचिरसंघटितेन शम्बूकवृत्तान्तेन शम्बूकवधव्यापारेणेत्यर्थः सम्भावितं अनुमितं जनस्थाने आगमनं यस्य तम् । सरयूर्नाम काचिन्नदी तस्या मुखादुपश्रुत्य शम्बूकवधाय रामो जनस्थानमागमिष्यतीति सम्भाव्यम इति सरयूमुखादाकर्ण्येत्यर्थः । तदेव रामस्यानिष्टमेव । सीतासमेता सीतया सह मीलिता भागीरथीत्यस्य विशेषणमेतत् । गृहाचारव्यपदेशेन लौकिकव्यवहारच्छलेन लोके हि बन्धुजनो वत्सरान्ते अपरबन्धुजनानां साक्षात्काराय तद्गृहमागच्छतीति व्यवहारः प्रायेण प्रचलति ।

श्रुधातोः शाब्दबोधे शक्तिरिति नैयायिकाः, श्रवणेन्द्रियजन्यप्रत्यक्षे शक्तिरितिमीमां-सकाः ; अत्र तु नैयायिकमतानुसारेण रामभद्रं उपश्रुत्येति सङ्गतिरिति संक्षेपः ।

(झ) सुरेति । भगवत्या गङ्गया सुविचिन्तितं । सम्यग्विवेचितं । कथं विचिन्तितमित्याह राजेत्यादि । राजधानीस्थितस्य अयोध्यायां निवसतः,तैस्तैः प्रसिद्ध-

अव्यग्रस्य पुनरस्य शोकमात्रद्वितीयस्य पञ्चवटीप्रवेशो महाननर्थ इति, तत्कथमिदानीं सीतादेव्या रामभद्र आश्वासनीयः स्यात्? । (झ)

तमसा। उक्तमेव (१) भगवत्या भागीरथीदेव्या, यद्देवयजनसम्भवे! सीते! अद्य खल्वायुष्मतोः कुशलवयोर्द्वादशजन्मसंवत्

रवश्यकर्त्तव्यै रित्यर्थः। अभ्युदयिकैः उन्नतिसाधकैः कार्य्यैः दुष्टनिग्रहशिष्टानुग्रहराष्ट्रदुर्गबलादिपर्य्यवेक्षणप्रभृतिभिर्व्यापारैः व्याप्टतस्य आसक्तचित्तस्य रामभद्रस्येति शेषः चित्तविक्षेपाः शोकेनाकर्षणानि नियताः नियन्त्रिता निरुद्धा इति यावत्। राज्ञि राजधानीस्थिते सर्वदा राजकार्य्यावेक्षणादिचिन्तया परिपूर्णे तस्य चित्ते सीताविरहजनितशोकः प्रवेष्टुं नावसरं लभत इत्यर्थः। पुनः किन्तु, अव्यग्रस्य राजकार्य्यादिचिन्तायामनासक्तचित्तस्य सुस्थचित्तस्येति यावत् शोकमात्रद्वितीयस्य केवलशोकसहचरस्य अस्य रामभद्रस्य। अनर्थः अनिष्टं अनिष्टकारणमित्यर्थः। इति इति हेतोः भगवत्या सुविचिन्तितमित्यर्थः। चिन्तान्तरशून्ये सुस्थचित्त एव शोकाविर्भावः स्यात्, शोकोद्दीपकपञ्चवटीवनप्रवेशे तु का कथेति भावः। तत्तस्मात् पञ्चवटीप्रवेशस्यैवानर्थहेतुत्वादित्यर्थः। आश्वासनीयः स्यात् सान्त्वयितुं शक्यः स्यादित्यर्थः। चरित्रदोषाशङ्कया स्वयं निर्वासितायाः सीतायाः पुनरधिकक्रोधोदयाशङ्कया रामस्य समीपगमनासम्भवेन सान्त्वनाकरणमसम्भवमेवेति कथं गङ्गा सीतामानीतवतीति मया पुनरिदं सन्दिह्यते; गङ्गया तु आत्मबुद्ध्या सुविचिन्तितमेवेति भावः।

व्यग्रो व्यासक्त आकुल इत्यमरः।

राजा धीयते अस्यामिति राजधानी करणाधिकरणयोश्चेत्यधिकरणे ल्युट्।

(ञ) तमेत्यादि। उक्तमेवेति एवशब्दः स्वयोगव्यवस्थापनार्थः। किमुक्तमित्याह यदित्यादि। द्वादशानां पूरण इति द्वादशः, सचासौ जन्मसंवत्सरश्चेति विग्रहः, तस्य,

---

(१) अत्र इति क्वचिदधिकः पाठः।

सरस्य (१) संख्यामङ्गलग्रन्थिरभिबध्यते (२) तदात्मनः पुराण-श्वशुरमेतावतो मानवस्य राजर्षिवंशस्य प्रसवितारं सवितार-मपहतपाप्मानं देवं स्वहस्तावचितैः पुष्पैरुपतिष्ठस्व। न च त्वामवनिपृष्ठवर्त्तिनीमस्मत्प्रभावाद्वनदेवता अपि द्रक्ष्यन्ति किं पुनर्मर्त्या इति; अहञ्चाज्ञापिता, तमसे! त्वयि प्रकृष्टप्रेमैव वधूवत्सला जानकीति अतस्त्वमेवास्याः प्रत्यनन्तरीभवेति। साहमधुना यथादिष्टमनुतिष्ठामि। (अ)

जन्मवत्सरावधिद्वादशपूरणीभूतवत्सरस्येत्यर्थः संख्यायै वयसो वर्षसंख्यायै मङ्गलजननाय ग्रन्थिः संख्यामङ्गलग्रन्थिः, जन्मावधि यावन्तो वत्सरा यातास्तावत्संख्याबोधनाय मङ्गलजननाय च धर्म्मशास्त्रोक्तो ग्रन्थिः स इत्यर्थः। अभिबध्यते वार्षिकीति शेषः। तत्पश्चात् अस्यां कुशलवयोर्जन्मतिथौ सर्वैः पालनीय धर्मत्वात् मङ्गलाचरणस्य कर्त्तव्यत्वादि-त्यर्थः। आत्मनः स्वस्याः तवेत्यर्थः। पुराणश्वशुरं प्राचीनश्वशुरं परम्परया श्वशुरमित्यर्थः। एतावत इयत्संख्यस्य, मानवस्य वैवस्वतमनोरपत्यस्य। सूर्य्यपुत्रो वैवस्वतमनुस्तत्पुत्र इक्ष्वाकुस्तस्माद् रामचन्द्रवंश उत्पन्न इति बोध्यम्। प्रसवितारं उत्पादयितारं। अपहतो नाशितः पाप्मा पापं येन तं एतेन सूर्य्यस्य महामाहात्म्यवत्त्वेन पूज्यत्वमिति भावः। सवितारं देवं सूर्य्यदेवं। उपतिष्ठस्व आराधय हि। कुशलवयोर्मङ्ग-लार्थं सूर्य्यपूजनार्थैव सीतामानीतवती गङ्गा, न तु रामस्य सान्त्वनार्थमिति मुरला या उक्तवाक्योत्तरविषयो भावः। गूढभावस्तु, सीतां प्रति परमविश्वासशाली रामः सीता-सम्पर्कं प्राप्य न कोपिष्यति, अपि तु आदरिष्यत एव सान्त्वितश्च भवेदिति। ननु पुष्पावचयनकाले लोका मामवलोक्य चेत् रामाय निवेदयिष्यन्ति तदा महाननर्थो भवेदित्याह नचेत्यादि। न चेत्यस्य द्रक्ष्यन्तीत्यनेनान्वयः अवनिपृष्ठवर्त्तिनीं भूतल-स्थितां सतीं। अस्मत्प्रभावात् मम वरमाहात्म्यादित्यर्थः। मर्त्याः मानवाः। इति

---

(१) क्वचित् जन्मपदं नास्ति। (२) अभिवर्त्तते इति क्वापि पाठः।

। मुर अहमप्यमुं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि, रामभद्रोऽप्यागत एवेति तर्कयामि। (ट)

तम। तदियं गोदावरीह्रदान्निष्क्रामस्य (ठ)

शब्दस्य उक्तमिति पूर्वेणान्वयः। प्रकृष्टप्रभावशालिनीनां वनदेवतानां दर्शनायोग्यायास्तव साधारणमानवैर्दर्शनमसम्भवमेवेति भावः। अहं तमसा। प्रकृष्टप्रेमा परमस्नेहवती। वधूः स्नुषा। रामेण मातृत्वेन स्वीकृताया गङ्गायाः सीता स्नुषेव स्यादिति द्रष्टव्यं। इति जानामीति शेषः। अन्तरस्य आत्मीयस्य सख्यादेः प्रति प्रतिनिधिरिति प्रत्यन्तरी सखीसदृशीत्यर्थः सखीव सीतायाः सहचारिणी भवेत्यर्थः। इतिशब्दस्य आज्ञापितेत्यनेनान्वयः। सा गङ्गया आज्ञापिता। आदिष्टं आदेशमनतिक्रम्येति यथादिष्टं सीतायाः सहचारित्वमित्यर्थः। अनुतिष्ठामि करोमि, सीतायाः सहचारिणी भवामीत्यर्थः।

अन्तरमवकाशावधि परिधानान्तर्धिभेदतादर्थ्ये।
छिद्रात्मीयविनावहिरवसरमध्येऽन्तरात्मनि च।
प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगत इति चामरः।
उपतिष्ठस्वेति पथ्याराधनयोर्श्वेति रूचादित्वादात्मनेपदं।

जन्मतिथौ जन्मग्रन्थिबन्धनस्य सूर्य्यपूजायाश्च प्रमाणं यथा, कृत्यचिन्तामणौ।

गुड़दुग्धतिलान्दद्याज्जन्मग्रन्थेश्च बन्धनं।
गुग्गुलं निम्बसिद्धार्थदूर्वागोरोचनान्वितं।
सम्पूज्य भानुविघ्नेशौ सहर्षिं प्रार्थयेदिदम्।
समित्पुष्पकुशादीनि श्रोत्रियःस्वयमाहरेत्।

इत्येकादशीतत्त्वधृतपद्मपुराणात् श्रोत्रियपदस्य चोपलक्षणत्वात् स्वहस्तावचितैः पुष्पैरित्युक्तं।

(ट) मुरेति। अमुं वृत्तान्तं सीतया सह गङ्गाया आगमनवार्त्तां। तर्कयामि सम्भावयामि।

(ठ) तमेति। सा चासौ इयञ्चेति तदियं सैयमित्यर्थः, एकवाक्यान्तर्गततया

परिपाण्डु दुर्बलकपोलसुन्दरं
दधती विलोलकबरीकमाननम् ।
करुणस्य मूर्त्तिरथवा (१) शरीरिणी
विरहव्यथेव वनमेति जानकी ॥ ४ ॥

शोकस्थजानकीतस्य विशेषणमेतत् । गोदावर्य्यां कश्चित् निम्नदिग्गामीऽब्दो गर्त्तमासीत् तस्मान्निष्क्रम्य उत्थाय ।

परेति । परिपाण्डू पुष्टिकरभोजनाभावात् रक्ताल्पत्वेन श्वेतच्छायौ दुर्बलौ अगाढ़ौ यौ कपोलौ गण्डौ ताभ्यां सुन्दरं स्वभावसुन्दर्य्याः सीताया विरहकृशतायामपि सत्यां मुखस्य किञ्चिदागन्तुकवैचित्र्यमिव जातमिति भावः । विलोला बन्धनाभावेन लम्बमानत्वात् चञ्चला कबरी केशरचना यत्र तत् तादृशं आननं मुखं दधती धारयन्ती जानकी सीता, करुणस्य शोकस्य मूर्त्तिरिव मूर्त्तिमान् शोक इव, अथवा शरीरिणी मूर्त्तिमती विरहव्यथा रामविच्छेददुःखेनेव वनं पञ्चवटीवनं एति आगच्छति ।

अत्र दुर्बलकपोलात् कृशीकृत्य तदुपत्तिसम्भवं सौन्दर्य्योत्पत्तिर्विषमालङ्कारः, तथा भावाभिमानि वाच्यं गुणोत्प्रेक्षाद्वयस्य तेषां नैरपेक्ष्येण स्थितेः संसृष्टिः ।

एतदनुरूपश्लोको यथा शाकुन्तले—

वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणी ।
अति निष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्त्ति ।

अनयोस्तु परिपाण्डुदुर्बलितादिश्लोक एव प्रशस्यतरः उत्प्रेक्षाद्वयेन सम्पूर्णयोग्यविरहावस्थाया व्यञ्जकत्वेन चमत्कारविशेषावहत्वात् ।

पतिविरहे पतिव्रताया अवस्थामाह शङ्खलिखितधृतमङ्गिरोवचनं—

आर्त्तार्त्ते, मुदिता हृष्टे वियोगे मलिना कृशा ।
मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता ।

मञ्जुभाषिणीवृत्तं ॥४॥

---

(१) इव वा इति क्वापि पाठः ।

मुर। इयं हि सा। (ड)

किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्म्मः केतकीगर्भपत्रम् ॥ ५ ॥

इति परिक्रम्य निष्क्रान्ते। (ढ)

विष्कम्भकः ॥ (ण)

(ड) मुरेति। इयं हि, इयमेव सा जानकी। जानकीं विलोक्य मुरलाया निरूपणमेतत्।

किसलयेति। हृदयमेव कोमलत्वात् कुसुमं, तत् शोषयतीति हृदयकुसुमशोषी दारुणो दीर्घः बहुकालव्यापी शोकः विरहकृतशोकः बन्धनात् वृन्तात् विप्रलूनं स्खलितं मुग्धं मनोहरं किसलयं पल्लवमिव स्थितं अस्याः सीतायाः परिपाण्डु नितान्तश्वेतच्छायं क्षामं कृशं शरीरं शरदिजः शरत्कालोत्पन्नो घर्म्म आतपः केतक्याः केतकीपुष्पस्य गर्भपत्रं मध्यस्थितपर्णमिव केशरमिवेत्यर्थः; ग्लपयति मलिनीकरोति।

अत्र शोषणं रसनाशकरणं, तच्च कुसुमस्यैव सम्भवति नतु हृदयस्य तेन शोषीतिपदं रूपकस्य साधकं उपमाया बाधकं ततश्च हृदये कुसुमत्वारोपस्य शाब्दत्वात् शोके आतपत्वारोपस्य चार्थत्वात् एकदेशविवर्त्तिरूपकमलङ्कारः उपमाद्वयेन सङ्कीर्य्यते।

क्षाममिति क्षै धातोः क्तप्रत्ययस्य "क्षै शुषिपचां मकवा" इत्यनेन मत्वं। शरदिज इति "प्रायेण सप्तम्याः कर्त्ते"ति सप्तम्याः अलुक्।

मालिनीवृत्तं ॥ ५ ॥

(ढ) इतीति। निष्क्रान्ते तमसामुरले इति शेषः।

(ण) विष्कम्भक इति। तल्लक्षणमुक्तं। अथ प्रेषिताऽस्मीत्यादिना वृत्तकथांशानां

नेपथ्ये। प्रमादः प्रमादः। (त)

ततः प्रविशति पुष्पावचयव्यग्रहस्ता सकरुणौत्सुक्यमाकर्णयन्ती सीता। (थ)

निदर्शनं "साहमधुना यथादिष्टमनुतिष्ठामि" इत्यादिना च वर्त्तिष्यमाणकथांशानां निदर्शनमिति द्रष्टव्यं।

(त) नेपथ्य इति। प्रमादोऽनवधानता विधातुरित्याक्षेपः। कथमन्यथा प्रवलो दुर्लभमाक्रामतीति भावः। अथवा प्रमादो विपत्तिः। लोके 'प्रमाद उपस्थित' इत्यादौ विपदर्थे प्रमादशब्दस्य भूरिप्रयोगात् तत्र तस्य व्यवहारनिबन्धना शक्तिः स्वीक्रियत इति।

अथ कथमयं तृतीयाङ्कः कविना समुपनिबद्ध इति प्रश्नकर्त्तारः केचिदस्माभिरपि पृच्छ्यन्ते, यदेते पृच्छन्तोभवन्तः "किमर्थमुत्तररामचरितं रचित"मिति कथं न पृच्छन्ति? येन हि यं कमपि विषयविशेषमभिसन्दधानः "किं" 'कथ'मित्येतावन्मात्रमनायासमुच्चारयन् प्रश्नकर्त्ता स्यात्। वस्तुतस्तु असाधारणचमत्कारिणी भावसौष्ठवप्रसविनी कविकल्पना न खल्वनुद्दिश्य प्रयोजनं प्रवर्त्तते; किन्तु च प्रयोजनद्वयं; तथाच कश्चिदपि प्रचुरप्रमाणप्रथितं विश्वस्तं निर्वासनोपयोगिनमपराधमन्तरेणापि निर्वासितायाः सीताया नितान्तनिष्ठुरं निर्वासयितारं भर्त्तारं प्रति नाल्पीयानपि विरागः, प्रत्युत परमादरप्रणयप्राचुर्य्यमिति सीतायां पतिव्रतादर्शतायाः प्रदर्शनमित्येकं। द्वितीयन्तु प्रजारञ्जनाय निर्वासयतोऽपि रामस्य सीतां प्रति नखलु कियानप्यविश्वास आसीदिति वासन्त्यादीनां प्रतीतिः, तथा "अस्तिचेदानीमश्वमेधाय सहधर्म्मचारिणी मे हिरण्मयी सीतायाः प्रतिकृति"रितिश्रुतवत्याश्च पुनः (रामः) मां यथार्थमेव विश्वसितिति किन्तु केवलं प्रजारञ्जनायैव निर्वासितवानिति रामं प्रति सीताया विश्वासश्च भवेदिति आपतत्येति सुधीभिर्भाव्यं।

(थ) तत इति। पुष्पाणां अवचये चयने व्यग्रौ आसक्तौ हस्तौ यस्याः सा करुणेन शोकेन शोकस्तु सीतायाः पञ्चवटीदर्शनेन रामस्मरणादिति बोध्यं, औत्सुक्येन उत्कण्ठया च सह तत्तथोक्तं। आकर्णयन्ती प्रमादशब्दमिति शेषः।

सीता। अम्महे, जानामि पिअसही मे वासन्दी वाहरदि। (द)

पुनर्नेपथ्ये।

सीतादेव्याः स्वकरकलितैः शल्लकीपल्लवाग्रै-

रग्रे लोलः करिकलभको यः पुरा पोषितोऽभूत्।

(द)। अहो! जानामि प्रियसखी मे वासन्ती व्याहरति।

(द) सीतेति। जानामि बुध्ये। व्याहरति भाषते। पूर्वपरिचितस्वरश्रवणादिति भावः।

सीतेति। पुरा वनवासकाले अग्रे समीपे लोलः पल्लवग्रहणाय चञ्चलः यः करिकलभकः हस्तिशावकः सीतादेव्याः स्वकरकलितैः निजहस्तसञ्चितैः न तु अन्येन केनचिदानायितैरिति भावः। एतेन करिशावकं प्रति यत्नातिशयो व्यज्यते। शल्लकीनां लताविशेषाणां पल्लवाग्रैः तद्भक्षणैरित्यर्थः पोषितो वर्द्धितोऽभूत्। अयं दृश्यमानः स करिकलभकः वध्वा सार्द्धं स्वकीयभार्यया सह पयसि जले विहरन् क्रीडन् अन्येन केनचित् उद्दामेन मदमत्तेन द्विरदपतिना हस्तियूथपेन वेगात् सन्निपत्य कुतोऽपि स्थानादागत्य अभियुक्त आक्रान्तः। सुतरां सीतादेव्याः पुत्रस्वरूपस्य करिशावकस्य विनाशसम्भावनया प्रमाद एवेति भावः।

अत्र शल्लपल्लेति करिकरेति व्यञ्जनद्वयस्य सकृत्साम्यात् छेकानुप्रासोऽलङ्कारः। ननु "करभः करिशावक" इत्यमरकोषात् करभशब्देनैव करिशावकाभिधानात् पुनः करिशब्दोपादानेन अधिकपदत्वदोष इति चेन्न—

"धनुर्ज्यादिषु शब्देषु शब्दास्तु धनुरादयः।

आरूढत्वादिबोधाय न दोषः पुनरुक्तता।"

इति कारिकायां "निरुपपदो मालाशब्दः पुष्पस्रजमेवाभिधत्ते इति स्थितावपि

सीता । किं तस्स ? । (ध)

पुनर्नेपथ्ये ।

वध्वा सार्द्धं पयसि विहरन् सोयमन्येनवेगा-(१)
दुद्दामेन द्विरदपतिना सन्निपत्याभियुक्तः ॥ ६ ॥

सीता । ससम्भ्रमं कतिचित् पदानि गत्वा अज्जउत्त ! परित्ताहि परित्ताहि मम तं पुत्तअं । विचिन्त्य । (२) हद्धी हद्धी ताइं ज्जेव चिरपरिचिताइं अक्खराइं पञ्चवटीदंसणेण मं मन्दभाइणीं अणुरुन्धन्ति । हा अज्जउत्त । इति मूर्च्छति । (न)

(ध) । किं तस्य ? ।

(न) ।। आर्य्यपुत्र ! परित्रायस्व परित्रायस्व मम तं पुत्रकं । हा धिक् हा धिक् तान्येव चिरपरिचितानि अक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीमनुरुन्धन्ति । हा आर्य्यपुत्र ! ।

'पुष्पमाला विभाति ते ' अत्र पुष्पशब्द उत्कृष्टपुष्पबुद्धौ " इति साहित्यदर्पणोक्तदिशा अत्रापि करिशब्देनोत्कृष्टकरिणावकबोधनान्न दोषः ।

करभक इत्यनुकम्पायां कः ।

मन्दाक्रान्तावृत्तं ॥ ६ ॥

(न) सीतेति । ससम्भ्रमं सत्वरं । चिरपरिचितानि दीर्घकालोच्चारणेन अभ्यस्तानि अक्षराणि ' आर्य्यपुत्र " इत्येते वर्णाः । अनुरुन्धन्ति अनुसरन्ति मम मुखात् प्रसरन्तीत्यर्थः उद्बोधकपञ्चवटीदर्शनेन स एवायं वनवासकाल इति भ्रमात् तदनुपस्थितावपि आर्य्यपुत्र इत्येते वर्णाः स्वयमेव मम मुखान्निर्गच्छन्तीति भावः ।

---

(१) दर्पादिति पाठान्तरं । (२) स्मृतिमभिनीय सर्वं क्षन्व्यमिति पाठभेदः ।

प्रविश्य तमसा। वत्से ! समाश्वसिहि समाश्वसिहि।

नेपथ्ये। विमानराज ! अत्रैव स्थीयताम्। (प)

सीता। समाश्वस्य ससाध्वसोत्कम्पोल्लासम्। अम्महे ! जलभरिदमेहत्थणिद गम्भीरमंसला कुदोण्णु एसा भारदी णिग्घोसभरन्तकण्णविवरं मंपि मन्दभाइणीं झत्ति उस्सावेदि ?। (फ)

तमसा। सस्मितास्रम्। अयि वत्से ! (व)

किमव्यक्तोऽसि निनदे (१) कुतस्त्येऽपि त्वमीदृशी। (२)

(फ)। अहो ! जलभृतमेघस्तनितगम्भीरमांसला कुतो नु एषा भारती निर्घोषभ्रियमाणकर्णविवरां मामपि मन्दभागिनीं झटिति उच्छ्वासयति ?।

(प) नेपथ्य इति। विमानराज इति पुष्पकविमानस्य सम्बोधनं। रामोक्तिरियं।

(फ) सीतेति। साध्वसेन भयेन उत्कम्पः शरीरचाञ्चल्यं, उल्लासः हर्षोच्छ्वासः ताभ्यां सहेति तथोक्तं। स्वरश्रवणेन रामोऽयं नवेति संशये स चेत्तदागत्य पुनरपि किं कुर्य्यादिति भयेनोत्कम्पः, असाधारणपतिव्रतायाः पतिदर्शने च उच्छ्वास इति बोध्यं। जलेन भृतस्य परिपूर्णस्य मेघस्य स्तनितमिव गर्जितमिव गम्भीरा मन्द्रा, मांसला बलवती बलवता जनेनोच्चारितेव प्रतीयमानेत्यर्थः एषा भारती वाणी कुतो जनादुत्पन्ना सतीत्यर्थः निर्घोषेण शब्देन भ्रियमाणे कर्णविवरे यस्या स्तां तथोक्तां। झटिति द्रुतं। उच्छ्वासयति सञ्जीवयति। मृतप्रायां मां आनन्देन उत्फुल्लयतीत्यर्थः।

तमेति। चिरानुभूतेऽपि स्वरे संशय इति विस्मयेन स्मितं, आगतेऽपि रामे परस्परसाक्षात्कारो न भवेदिति दुःखेन चास्रं ताभ्यां सहेति सस्मितास्रं।

किमिति। स्तनयित्नोर्मेघस्य अयतो कुतस्त्येऽपि निनदे गर्जिते सति मयूरीव त्वं अव्यक्ता अपरिस्फुटे कस्मादनित्यस्पष्टे इत्यर्थः कुतस्त्ये कस्मादविदितदेशादागते कस्माद्देशादयं शब्द आगत इति देशविशेषज्ञाने सत्यपि तत्र गत्वा जननिरूपणसम्भावना स्यादत्र तु सापि न स्यादिति भावः, निनदे 'विमानराज ! अत्रैव स्थीयतां'

---

(१) अपरिस्फुटनिक्वाणे इति पाठभेदः। (२) कुतस्त्ये प्रीतिरीदृशीति पाठान्तं ?।

स्तनयित्नो र्मयूरीव चकितोत्कण्ठिता (१) स्थिता ? ॥ ७ ॥

सीता। भअवदि ! किं भणासि अपरिप्फुड़त्ति। मए उण सरसंजोएण पच्चभिजाणिदं, अज्जउत्तो ज्जेव वाहरदि। (भ)

तम। श्रूयते, तपस्यतः किल शूद्रस्य दण्डधारणार्थमैक्ष्वाको राजा जनस्थानमागत इति। (म)

(भ) भगवति ! किं भणसि अपरिस्फुटमिति। मया पुनः स्वर संयोगेन प्रत्यभिज्ञातं आर्य्यपुत्र एव व्याहरति।

मितिमात्रे शब्दे सति किं कस्मात् चकिता चञ्चला उत्कण्ठिता उत्सुका च सती स्थितासि।

अत्र प्रकृष्टकारणाभावेऽपि चकितत्वोत्कण्ठितत्वरूपकार्य्योत्पत्ते र्विभावनाऽलङ्कारः पूर्णोपमया सङ्कीर्य्यते। तथा मयूरी अस्ति, त्वन्तु असि इति प्रथममध्यमपुरुषभेदात् "त्वमिव राजसि तन्वी" ति साहित्यदर्पणोदाहृतवत उपमागतभग्नप्रक्रमत्वदोषः, स च "निनदे कथमव्यक्ते" इति पाठेन समाधेयः।

"अभ्रं मेघो वारिवाहः स्तनयित्नु र्बलाहक" इत्यमरः।

उत्कण्ठिता उत्कण्ठा सञ्जातास्या इति "तदस्य सञ्जातं तारकादिभ्य इतच्" इति इतच्।

पथ्या वक्त्रं वृत्तं ॥ ७ ॥

(भ) सीतेति। भगवति ! तमसे !। अव्यक्त इति तमसोक्तवाक्यस्य अर्थमादाय सीतायाः प्रश्नः अपरिस्फुट इति। स्वरसंयोगेन कण्ठस्वरसम्बन्धेन प्रत्यभिज्ञातं अनुभूतस्य पुनरनुभवः कृतः ' अनुभूतस्य पुनरनुभवः प्रत्यभिज्ञे " ति नैयायिकाः। व्याहरति भाषते।

(म) तमेति। शूद्रस्य शम्बूकस्य, दण्डधारणार्थं दण्डकरणार्थं ऐक्ष्वाक इक्ष्वाकुवंशोत्पन्नः, राजा रामः। इति शब्दस्य श्रूयत इत्यनेनान्वयः।

---

(१) चकितोत्कण्ठितमिति क्वापि पाठः।

सीता। दिट्ठिआ अपरिहीणराअधम्मो क्खु सो राआ। (य)

नेपथ्ये। यत्र द्रुमा अपि मृगा अपि बन्धवो मे
यानि प्रियासहचरश्चिरमध्यवात्सम्।
एतानि तानि बहुनिर्झरकन्दराणि
गोदावरीपरिसरस्य गिरेस्तटानि ॥ ८ ॥

सीता। दृष्ट्वा। हा कधं पहादचन्दमण्डलावण्डरपरिक्ख म-

(य) दिष्ट्या अपरिहीनराजधर्मः स राजा।

(र) हा कथं प्रभातचन्द्रमण्डलापाण्डुरपरिक्षामदुर्बलेन आकारेण अयं सौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञात आर्य्यपुत्र एव, तन्मां धारय।

(य) सीता। स राजा रामः, दिष्ट्या भाग्येन न परिहीनः परित्यक्तः राजधर्मः राजकर्त्तव्यं येन सः।

यत्रेति। यत्र येषु तटेषु द्रुमा अपि वृक्षा अपि, मृगाअपि पशवोऽपि मे मम बन्धवः आसन्निति शेषः। छायादानशरीरकण्डूयनादिना समुपकारित्वादितिभावः। प्रियासहचरः सीतया सहितः चिरं बहुकालं यानि तटानि अध्यवात्सम् आश्रित्य वासं कृतवान्, एतानि दृश्यमानानि बहवो निर्झरा जलप्रवाहाः कन्दरा गुहाश्च येषु तानि तथोक्तानि गोदावर्य्या नद्याः परिसरः पर्य्यन्तस्थितः समीपवर्त्तीति यावत् तस्य गिरेः पर्वतस्य तानि तटानि समीपभूमयो वर्त्तन्त इत्यर्थः।

अत्र मुनि तत्पत्नकुमारादिषु का कथा, द्रुमा अपि मृगा अपि मम बन्धव आसन्नित्यर्थापतनादर्थापत्तिरलङ्कारः।

पशवोऽपि मृगाः। पर्य्यन्तभूः परिसरः इति चामरः।
यानीति अन्वध्याङ्वसः इत्यधिकरणस्य कर्म्मत्वम्।

वसन्ततिलकावृत्तम् ॥८॥

(र) सीतेति। हा कथमित्येकमव्ययं महाविषादसूचकं। प्रभातचन्द्रमण्डलवत् आपाण्डुरः श्वेतच्छायः, दुर्बलो बलहीन इव परिक्षामायस्तेन आकारेण आकृत्या

दुब्बलेण आआरेण अअं (१) सोम्मगम्भीराणुभावमेत्तपच्चभिआणिदो अज्जउत्तो ज्जेव, ता मं धारेहि (२) ।

इति तमसमाश्लिष्य मूर्च्छति । (१)

तम । धारयन्ती । वत्से ! समाश्वसिहि समाश्वसिहि ।

नेपथ्ये । अनेन पञ्चवटीदर्शनेन

अन्तर्लीनस्य दुःखाग्ने रद्योद्दामं ज्वलिष्यतः ।

उत्पीड़ इव धूमस्य मोहः प्रागावृणोति माम् ॥८॥

उपलक्षितस्तत्रार्थः । अयं दृश्यमानो जनः सौम्यं शान्तं गम्भीरं स्थिरं यदनुभावमात्रं केवलप्रभावस्तेन प्रत्यभिज्ञातः पुनरनुभूत आर्य्यपुत्रो राम एव आकृतिवैषम्यात् सोऽयं नवेति संशय एव स्यात् किन्तु पूर्वानुभूतप्रभावदर्शनात् सोऽयमिति निश्चय इति भावः। तस्मात् रामस्य तादृक् कष्टकरावस्थादर्शनेन मूर्च्छया पतनेन आघातसम्भवादित्यर्थः धारय अवलम्बस्व । आयुर्वेदोक्तात् मूर्च्छातोऽयं मूर्च्छाप्रकारः, यत् पतनात् प्राक् रोगी धारयितुमुपदिशतीत्यद्भुतं ।

अनुभावः प्रभावेऽपीत्यमरः ।

अन्तरिति । अन्तः अन्तःकरणे लीनस्य कालिनापचयात् अल्पमात्रावशेषेण गुप्तभावेन स्थितस्य, अद्य अनेन पञ्चवटीदर्शनेन उद्दामं अत्यन्तं ज्वलिष्यतः सन्दीपिष्यमाणस्य बाहुल्यं प्राप्स्यत इत्यर्थः उद्बोधकप्राप्त्या उद्बोधनीयस्य बाहुल्यावश्यम्भावादितिभावः। दुःखमग्निरिव तस्य, धूमस्य उत्पीड़ोराशिरिव मोहः मां प्राक् सम्पूर्णविकासात् पूर्वं आवृणोति आच्छादयति। यथा वह्निजनितोधूमो वह्नेः पूर्णविकासात् पूर्वं तत्स्थानमाच्छादयति, तथा दुःखजनितो मोहः दुःखस्य पूर्णविकासात् पूर्व्वं मामावृणोतीति सरलार्थः।

अत्र पूर्वार्द्धे लुप्तोपमा, परार्द्धे च साधारणोपमा इत्युभयोः रूपकाङ्गिभावेन सङ्करः।

(१) अयं सो गम्भीराणुभाव ··· इति पाठान्तरं । अअं णिच्चसोम्मगम्भीराणुभाव इत्यपि पाठः। (२) ता धारेदु मं पिअसही इति पाठभेदः।

हा प्रिये ! जानकि ! । (ल)

तमसा । स्वगतम् । इदं तदाशङ्कितं गुरुजनेनापि । (व)

सीता । समाश्वस्य । हा कधं एदं । (श)

पुनर्नेपथ्ये । हा देवि ! दण्डकारण्यवासप्रियसखि ! विदेह-राजपुत्रि ! इति मूर्च्छति । (ष)

सीता । हद्धी हद्धी मं मन्दभाइणिं उद्दिसिअ आमीलन्तणेत्तणीलुप्पलो मुच्छिदो ज्जेव, हा हा कधं धरणीवट्ठे णिरुस्साहं णिसहं

(श)। हा कथमेतत् ।

(स) हाधिक् हाधिक्, मां मन्दभागिनीमुद्दिश्य आमीलन्नेत्रनीलोत्पलो मूर्छित एव, हा हा कथं धरणीपृष्ठे निरुत्साहनिःसहं विपर्यस्तः ; भगवति ! तमसे ! परित्रायस्व परित्रायस्व जीवय आर्यपुत्रम् ।

नच ज्वलिष्यत इति साधकसत्त्वात् दुःखाग्नेरिति निरङ्गं केवलं रूपकमिति वाच्यं धूमस्योत्पीड इव मोह इत्युपमानुसारिण्या दुःखाग्नेरित्युपमाया एवौचित्यादिति सुधीभि-र्विभावनीयम् ॥ ८ ॥

(ल) हेति । कुत्रासीति वाक्यशेषः ।

(व) तमेति । गुरुजनेन अगस्त्यलोपामुद्रागङ्गादिनेत्यर्थः । आशङ्कितं तदिदं रामस्य मूर्च्छापतनादिकं, उपस्थितमिति शेषः ।

(ष) पुनरिति । दण्डकारण्यवासे तत्समय इत्यर्थः, प्रियसखि ! सहायभावेन नानोपकारकरणादिति भावः ।

(स) सीतेति । आमीलती मुद्रिते नेत्रे नीलोत्पले इव यस्य स तथोक्तः । निरुत्साहेन कमपि विषयं प्रति उद्यमाभावेन निःसहं अवशं यथा स्यात्तथा धरणी-पृष्ठे भूतले विपर्य्यस्तः पतितः । परित्रायस्व मामिति शेषः । जीवय सचेतन्यं कुरु । आर्यपुत्रजीवनेनैव मम परित्राणं भवेदिति भावः ।

विपल्हत्थो ; भअवदि ! तमसे ! परित्ताहि परित्ताहि जीवावेहि अज्जउत्तं । इति पादयोः पतति । (ख)

तम । त्वमेव ननु कल्याणि ! सञ्जीवय जगत्पतिम् ।
प्रियस्पर्शो हि पाणिस्ते तत्रैव नियता भव * ॥१०॥

सीता । जं भोदु तं भोदु, जधा भअवदी भणादि । (ह)

इति ससम्भ्रमं निष्क्रान्ता ।

ततः प्रविशति मूर्च्छानिपतितः साखया सीतया स्पृश्यमानः साह्लादोच्छ्वासो रामभद्रः । (क)

(ह) यद्भवतु तद्भवतु, यथा भगवती भणाति ।

"उत्साहोऽध्यवसायः स्या" दित्यमरः ।

निर्मक्षिकमित्यादिवत् निरुत्साहमिति अभावार्थेऽव्ययीभावः ।

त्वमिति । ननु कल्याणि ! हे शुभे ! त्वमेव जगत्पतिं पृथिवीपालं रामं सञ्जीवय उज्ज्ञं कुरु । तवैव करणीयमेतत् नत्वन्यस्य इत्येवशब्दार्थः । हि यस्मात् ते तव पाणिः करतलं, प्रियः प्रीतिकरः स्पर्शो यस्य सः । सुतरां रामस्य चैतन्यसम्पादनं तव यथा सुकरं नान्यस्य तथेति भावः । अतएव तवैव पाणिना स्पर्श एव नियता व्याप्रता भव ।

अत्र चतुर्थपादार्थं प्रति तृतीयपादगतवाक्यार्थस्य हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ १० ॥

(ह) सीतेति । यद्भवतु तद्भवतु, अनुमत्यभावेऽपि हस्तस्पर्शकरणे क्रुद्धः सन्तुष्टो वा भवतु इत्यर्थः । ईदृशसमये तन्न विवेचनीयमिति भावः । यथा भगवती तमसा भणति ब्रवीति, तथा करोमि पाणिना स्पृशामीत्यर्थः । ससम्भ्रमं सत्वरं ।

(क) तत इति । साखया रामस्य मूर्च्छितावस्थादर्शनेन सवदश्रुसहितया । आह्लादेन हर्षेण, उच्छ्वासेन चैतन्येन च सहेति साह्लादोच्छ्वासः ।

सीता । किञ्चित् सहर्षमात्मगतं । जाणामि, पुणोवि पच्चागदं विअ जीविदं तिल्लोअणाहस्स (१) (ख)

रामः । हन्त भोः ! किमेतत् । (ग)

प्रश्चोतनं नु हरिचन्दनपल्लवानां ।
निष्पीड़ितेन्दुकरकन्दलजो नु सेकः ।

(ख) जानामि, पुनरपि प्रत्यागतमिव जीवितं त्रिलोकनाथस्य ।

(ख) सीतेति । त्रिलोकनाथस्य जगदीश्वरस्य रामस्य जीवितं चैतन्यं पुनरपि प्रत्यागतमिव इत्यहं जानामि बुध्ये, श्वासप्रश्वासादिदर्शनादिति भावः । लक्ष्मीरूपा सीता नारायणावतारत्वेन रामस्य जगदीश्वरत्वं जानात्येव, तस्य तु चात्मगतत्वेन कथनि अन्यैरश्रव्यत्वात् न मानुषवद्व्यवहारहानिः । ननु कथमनयोर्मानुषवद्व्यवहार इति सत्यं जगति स्त्रीपुरुषाणां चरित्रशिक्षादानाय जगदीश्वरीजगदीश्वरयोः सीतारामयोर्मानुष-भावेन व्यवहारः सजातीयशिक्षायाः शीघ्रफलकत्वात् । इदन्तु कविना अध्यात्मरामायणा-वलम्बनेनोक्तम् । वाल्मीकिमते तु राम आदर्शचरितो मानव एवेत्यनुसन्धेयम् ।

(ग) राम इति । हन्तभोरिति हर्षविस्मयसूचकमेकमव्ययम् । किमेतदित्यस्य श्लोकेनान्वयः ।

प्रश्चोतनमिति । एतत् स्पर्शनं किं हरिचन्दनपल्लवानां चन्दनवृक्षविशेषकिस-लयानां प्रश्चोतनं रसो निर्य्यास इति यावत् नु वितर्कयामीत्यर्थः तद्वत् शैत्याति-शयकरत्वादिति भावः । सर्वत्राप्येवं नुशब्दो वितर्के । पल्लवपदं शैत्यातिशयद्योतनार्थं । निष्पीड़िताः मर्द्दिता इन्दुकरकन्दलाः चन्द्रकिरणनवाङ्कुरा यस्मिन् स तथोक्तो मर्द्दित-चन्द्रकराङ्कुरादुत्पन्नो रस इत्यर्थः तस्मात् जायत इति इन्दुकरकन्दलजः आमर्द्दित-चन्द्रकराङ्कुरनिर्य्यासजनित इत्यर्थः सेको नु, तथा चातत्रयोः नितान्तसन्तप्तयोर्जीवन-सत्त्वोः [illegible]

आतप्तजीवनमनःपरितर्पणो मे (१)
सञ्जीवनौषधिरसो नु हृदि प्रसिक्तः ॥ ११ ॥
स्पर्शः पुरा परिचितो नियतं स एष
सञ्जीवनश्च मनसः परिमोहनश्च ।

च। ओषधिः फलपाकेन मृतसञ्जीवन्यादिः तस्या रसो निर्य्यासो मे मम हृदि प्रसिक्तो नु। अतिशयानन्दतमावात् कथमकस्मान्मम चैतन्योत्पत्तिरिति भावः।

अत्र स्पर्शे प्रत्यालेपनादीनां संशयात् तत्र च निश्चयाभावात् शुद्धसन्देहालङ्कारः। परश्लोके 'स्पर्शः पुरा परिचितो नियतं स एव' इत्युक्त्या तत्स्पर्शस्याप्यनुभवादुभयकोटिकज्ञानरूपः संशयो रामस्य जात इत्यनुसन्धेयम्।

इन्दुकरचन्दननिष्पीडनासम्बन्धेऽपि तत्सम्बन्धोक्त्या अतिशयोक्तिश्च अनयोरङ्गाङ्गिभावेन सङ्करः।

"तैलपर्णिक गोशीर्षे हरिचन्दनमस्त्रियाम्।" "ओषध्यः फलपाकान्ता" इति चामरः।

वसन्ततिलकावृत्तम् ॥ ११ ॥

स्पर्श इति। पुरा सीतया सहैकत्रावस्थानकाले परिचितः ईदृक्तया विदितः सञ्जीवन उत्साहवर्द्धक इत्यर्थः मनसो हृदयस्य परिमोहनः आनन्दबाहुल्येन अवशताजनकश्च नियतं निश्चितं एव अनुभूयमानः स स्पर्शः। यः स्पर्शः सन्तापजां वियोगवेदनाजनितां मूर्च्छां प्रतिहत्य विनाश्य सद्यः तत्क्षणात् आनन्दनेन आनन्दजननेन पुनः जडतां मनसस्तदेकानुभवपरायणत्वात् विषयान्तरानभिज्ञतां आतनोति करोति।

अत्र जडताकरणासम्बन्धेऽपि तत्सम्बन्धोक्त्या अतिशयोक्तिरलङ्कारः। अत्र छन्दस्य चरम पाठेन विधेयाविमर्शदोषः, स च पराई प्रथमं ततस्तृतीयपादं पठित्वा निरसनीयः।

"सद्यः सपदि तत्क्षणात्।" "जडोऽज्ञ" इतिचामरः।

---

(१) आतप्तजीवितस्य तोः। जीवितपुनः परितर्पणोऽयं इति पाठभेदः।

सन्तापजां सपदि यः प्रतिहत्य मूर्च्छा-
मानन्दनेन जड़तां पुनरातनोति ॥ १२ ॥

सीता । ससाध्वसोत्कम्पमपसृत्य । * । एत्तिअं ज्जेव दाणिं मे बहुदरं ; (घ)

रामः । उपविश्य । न खलु वत्सलया सीतादेव्या अभ्युपपन्नोऽस्मि ? । (ङ)

सीता । हद्धी हद्धी, किं त्ति मं अज्जउत्तो मग्गिस्सदि ? । (च)

(घ) एतावदेव इदानीं मे बहुतरं ।

(च) हाधिक् हाधिक्, किमिति आर्य्यपुत्रो मां मार्गिष्यति ? ।

वसन्ततिलकावृत्तं ॥ १२)

(घ) सीतेति । साध्वसं अनुमत्यभावेऽपि समीपागमनेन रामस्य क्रोधभयं, उत्कम्पः स्पर्शेन सात्त्विकात् दैहचाञ्चल्यं ताभ्यां सहेति तत्, तथोक्तम् । इदानीं निर्वासनकाले एतावदेव मम स्पर्शस्य सुखजनकत्वस्वीकारपर्य्यन्तमेव बहुतरं अतिरिक्तं अत्यन्तादरत्वेन मन्तव्यमित्यर्थः प्रेमालापसहवासादिप्रकृतसुखानामिकाम्यानन्यवादिति भावः ।

(ङ) राम इति । वत्सलया स्नेहशालिन्या । अभ्युपपन्नः प्राप्तः स्पृष्ट इति यावत् । अत्र काकुस्वरेण प्रश्नो द्योत्यते, तथाच न खलु अभ्युपपन्नोऽस्मि किं, अपितु अभ्युपपन्न एव, कथमन्यथा तादृगलौकिकसुखस्पर्श इति भावः ।

(च) सीतेति । हाधिगित्येकं शोकसूचकमव्ययं तस्य द्वैधो द्विर्वचनम् । यस्याहमनुगमनमेव सहचारिणी आसं, स ममेदानीमन्वेषणाय प्रवृत्त इति महाशोकस्थानमेतदिति भावः । मार्गिष्यति अन्वेषणं करिष्यति । रामस्य मुखमलिनशरीरचाञ्चल्या-दिदर्शनात् सीताया अयं संशयः ।

---

* ससाध्वसकरुणमिति पाठान्तरं । भयशोकसहितमिति तदर्थः ।

रामः । भवतु, पश्यामि । (छ)

सीता । भअवदि ! तमसे ! ओसरह्म ! जइ दाव मं पेक्खिस्सदि, तदो अणब्भणुण्णादसण्णिधाणेण अहिअं पि मम महाराओ कुविस्सदि । (ज)

तमसा । अयि वत्से ! भागीरथीवरप्रभावाद्वनदेवतानामप्यदृश्या संवृत्तासि । (झ)

(ज) भगवति ! तमसे ! अपसरामः, यदि तावन्मां प्रेक्षिष्यते, तदा अनभ्यनुज्ञातसन्निधानेन अधिकमपि मम महाराजः कोपिष्यति ।

(छ) राम इति । भवतु, सीताया अभ्युपपत्तिरनभ्युपपत्तिर्वा भवतु इत्यर्थः । पश्यामि समन्तादवलोकनेन तन्निरूपयामीत्यर्थः । पश्यामीत्यतः परं 'इति समन्तादवलोकयति' ईदृशं किञ्चित् कविवाक्यं मन्तव्यं अन्यथा पूर्वपरवर्त्ति सीतावाक्याभ्यां सहासामञ्जस्यं स्यादिति विवेच्यम् ।

(ञ) सीतेति । अपसरामः अस्मात् स्थानादन्यत्र गच्छामः वयमिति शेषः "आदरे" ति बहुवचनम् । अनभ्यनुज्ञातम् अननुमतं समीपमागच्छेत्यनुमत्यभाव-विशिष्टमिति यावत् यत् सन्निधानं निकटवर्त्तित्वं तेन । मां प्रति नितान्तावज्ञां विना निर्वासनं न स्यात्, सुतरां अवज्ञया निर्वासितायाः मम आर्यपुत्रानुमतिमन्तरेण समीप-गमनं कोपकारणमेवेति भावः ।

(झ) तमेति । भागीरथीवरप्रभावात् गङ्गाया वरमाहात्म्यात् । वनदेवतानामपि अदृश्या त्वमसि, किं पुनर्मानुषस्य रामस्येति वाक्यशेषः ; सुतरां तव अपसरणप्रयोजनं नास्तीति भावः ।

सीता। आं, अत्थि एदं। (ञ)

रामः। हा प्रिये! जानकि! ननु प्रिये जानकि!। (ट)

सीता। समन्युगद्गदम्। अज्जउत्त! असरिसं क्खु एदं वअणं इमस्स वुत्तन्तस्स। सास्रम्। अहवा किं त्ति वज्जमई जम्मन्तरेसु वि पुणो असम्भाविददुल्लहदंसणं मं ज्जेव मन्दभाइणीं उद्दिसिअ वच्छलस्स एवं वादिणो अज्जउत्तस्स उवरि णिरणुक्कोसा भविस्सं?, अहं एदस्स हिअअं आणामि मम एसोत्ति। (ठ)

(ञ) आं अस्ति इदम्।

(ठ) आर्य्यपुत्र! असदृशं खलु एतत् वचनं अस्य वृत्तान्तस्य। अथवा किमिति वज्रमयीं जन्मान्तरेषु अपि पुनः असम्भावितदुर्लभदर्शनां मामेव मन्दभागिनीं उद्दिश्य वत्सलस्य एवंवादिन आर्य्यपुत्रस्य उपरि निरनुक्रोशा भविष्यामि? अहमेतस्य हृदयं जानामि मम एष इति।

(ञ)। आमिति पूर्ववृत्तस्मरणार्थमव्ययम्। इदं भागीरथीवरप्रभावान्मम अदृश्यत्वं अस्तीति स्वीकारः; अतो नापसरामीति भावः।

(ट) राम इति। अनुनयविशेषद्योतनार्थं पुनर्ननु प्रिये जानकीत्युक्तम्।
"प्रश्नावधारणाऽनुज्ञाऽनुनयामन्त्रणे ननु" इत्यमरः।

(ठ) सीतेति। मन्युना शोकेन गद्गदः अस्फुटः, अस्पष्टरूपेणोच्चारणं तेन सहेति समन्युगद्गदं आहेति क्रियाविशेषणमेतत्। इदं वचनं 'प्रिये जानकी'ति स्नेहव्यञ्जकप्रीतिकरं वचनं अस्य वृत्तान्तस्य अकारणनिर्वासनरूपनिर्दयव्यवहारस्येत्यर्थः: असदृशं अयोग्यं; निर्वासितां प्रति 'रे पापीयसि' इति निन्दासूचकसम्बोधनमेव युज्यते, ननु प्रिये इति सम्बोधनं व्यवहारानुरूपोक्तेरेव महात्मनां धर्म्मत्वात्, अन्यथा "वचस्यन्यन्मनस्यन्यत् कर्म्मण्यन्यद् दुरात्मना" मितिन्यायेन

राम:। सर्वतो विलोक्य सनिर्वेदम्। हा! न काचिदत्र!। (ड)

सीता। भअवदि! तमसे! णिक्कारणपरिच्चाइणोवि एदस्स

(ढ) भगवति! तमसि! निष्कारणपरित्यागिनोऽपि एतस्य एतेन एवंविधेन दर्शनेन कीदृशो मे हृदयानुबन्ध इति न जानामि न जानामि।

दुरात्मतापत्तेरिति भावः। प्रजाविरागसम्भावनयैव मम निर्वासनं कृतं न तु चरित्रदोषाशङ्कयेति कथमन्यथा इदानीमीदृग्व्यवहार इति विवेकोदयात् पश्चान्तरमाह अथवेति। वज्रमयी नितान्तकठिना कथमन्यथा आर्य्यपुत्रस्य ईदृगवस्थादर्शनेनापि मे न हृदयं विदीर्य्यत इति भावः। जन्मान्तरेष्वपि पुनः असम्भावितं अनिश्चितं दुर्लभं दर्शनं यस्याः सा, अस्मिन् जन्मनि निर्वासनेन गङ्गाया वरप्रभावेन च मम अदर्शनं जातं जन्मान्तरेष्वपि दर्शनं भवेदिति को निश्चित्य वक्तुं शक्नुयादिति भावः। एतत् सत्यस्य मां प्रति स्नेहशालिनः। एवंवादिनः, हा प्रिये इत्यादि खेदोक्तिकारिणः। निरनुक्रोशा निर्दया किमिति भविष्यामि कथमपि नेत्यर्थः। एतस्य आर्य्यपुत्रस्य हृदयं मनोगतं भावमित्यर्थः। एष आर्य्यपुत्रः मम हृदयं जानातीत्यर्थः। आ बाल्यभावेव उभयोर्मनोभावं जानीवः, सुतरां आवयोः कोऽपि कमपि प्रति विद्वेषो न भवेदिति निश्चय एवास्ति, तथापि यदनेन दुर्व्यवहारः कृतः, तत्तु दैववशादिति भावः। भागीरथीवरप्रभावात् यथा कश्चिदपि सीताया दर्शनं न प्राप्तः, तथा स्वभावोच्चारितवाक्यमपि कश्चिन्न शृणुयादिति मन्तव्यं तेन रामस्यातिनिकटेऽपि स्वाभाविकवाक्योच्चारणे तच्छ्रवणेन रामस्य न सीतापरिचय इति बोध्यम्।

(ड) राम इति। सर्वतः सर्वासु दिक्षु। निर्वेदेन आत्मावमाननया सहितं सनिर्वेदम्। सीताया अदर्शनेऽपि तदुद्देशेन विलापसम्बोधनादिकरणात् निर्थ्यानर्थं तथा आत्मनोऽवमाननमिति बोध्यम्। तथाच साहित्यदर्पणः—

"तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमानना।"

अत्र अस्मिन् स्थाने काचित् कापि व्यक्तिर्नास्तीत्यर्थः। सुतरां कुतः सीतेति भावः

(ढ) सीतेति। एतस्य आर्य्यपुत्रस्य रामस्य एवंविधेन दर्शनेन शोककातर-

एदिणा एवं विधेण दंसणेण कोदिसो मे हिअआणुवन्धोत्ति ण आणामि ण आणामि । (ढ)

राम । जानामि वत्से ! जानामि । (ण)

तटस्थं नैराश्यादपि च कलुषं विप्रियवशा-
द्वियोगे दीर्घेऽस्मिन् झटिति घटनोत्तम्भितमिव ।
प्रसन्नं सौजन्यादपि तु करुणैर्गाढ़करुणं
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन् क्षण इव ॥१३॥

त्वदर्शनेनेत्यर्थः । हृदयानुबन्धः मनसोऽवस्था । इति न जानामि किं तु न शक्नोमीत्यर्थः तामवस्थामनुपदर्शयितुं तमसा विवृणोति । न जानामीत्यस्य दैन्ये द्विर्वचनम् ।

(ण) तमेति । जानामि तव हृदयावस्थामिति शेषः । अवधारणे द्विर्वचनं जानाम्येवेत्यर्थः ।

किमिव जानासीत्याह तटस्थमिति । तव हृदयं मनः, नैराश्यात् पुनः संयोगसम्भावनाया अभावात् तटस्थमुदासीनं संयोगोपायकरणादौ निरुद्यममित्यर्थः, अपि च तथा विप्रियवशात् प्रियस्य विरुद्धो विप्रियः दुर्व्यवहारः तद्वशात् अकारणपरित्यागजनितमिव अनिबन्धनादित्यर्थः कलुषं क्रोधेनाविलं पूर्वमासीदित्यर्थः तथा अस्मिन् दीर्घे अनन्तकालव्यापिनि वियोगे विच्छेदमध्ये अस्मिन् क्षणे समये झटिति अकस्मात् घटनया मिलनेन उत्तम्भितमिव स्तब्धप्रायं आश्चर्य्यवशादितिकर्त्तव्यताज्ञानशून्यमित्यर्थः तथा सौजन्यात् प्रेमप्रकाशकसम्बोधनादिना साधुत्वप्रकाशात् प्रसन्नं सन्तुष्टं, अपि तु तथा करुणैः विलापादिना शोकप्रकाशैः गाढ़ः तीव्रः शोको यस्मिन् तादृशं, रामस्य शोकार्त्तत्वदर्शनात् तवापि तीव्रशोकातुरं मन इत्यर्थः, तथा प्रेम्णा प्रचुरप्रणयप्रकाशेनेत्यर्थः द्रवीभूतमिव आनन्देन गलितमिव ।

अत्र भावाभिमानि वाच्यं क्रियोत्प्रेक्षाद्वयम्, तथा नैराश्यादिकारणेन सह तटस्थत्वादिकार्य्यस्य वर्णनात् हेतुर्नामालङ्कारश्च अनयोरङ्गाङ्गिभावेन सङ्करः । तथा च चन्द्रालोके

रामः । देवि ! ।

प्रसाद इव मूर्त्तस्ते स्पर्शः स्नेहार्द्रशीतलः ।
अद्याप्यानन्दयति (१) मां त्वं पुनः क्वासि नन्दिनि ! ॥१४॥

सीता । एदे दे अगाधदंसिदसिणेहसम्भारा आनन्दणिस्सन्दिणो सुदा मए अज्जउत्तस्स उल्लावा, जाणं पच्चएण णिक्कारणपरिच्चाअसल्लिदोवि बहुमदो मे जम्मलाहो । (त)

(त) एते ते अगाधदर्शितस्नेहसम्भारा आनन्दनिष्यन्दिनः श्रुता मया आर्य्यपुत्रस्य उल्लापाः, येषां प्रत्ययेन निष्कारणपरित्यागशल्यितोऽपि बहुमतो मे जन्मलाभः ।

हेतोर्हेतुमता सार्द्धं वर्णनं हेतुरुच्यते ।

उत्तम्भितमिति उदःस्थास्तम्भोरिति सवर्णः सलोपः ।

शिखरिणीवृत्तम् ॥१३॥

प्रसाद इति । स्नेहेन प्रेम्णा आर्द्रः क्लिन्नः अत एव शीतलः ते तव स्पर्शः, मूर्त्तः मूर्त्तिमान् प्रसाद इव अनुग्रह इव अद्यापि स्पर्शक्षणे का कथा स्पर्शध्वंसक्षणेऽपि मां आनन्दयति सुखीकरोति, पुनः किन्तु हे नन्दिनि ! आनन्दकारिणि ! त्वं क्व कुत्रासि ? त्वमेतावत्येव मम प्रियतमा, यत्तव स्पर्शासद्भावेऽपि तत्कारणादेव आनन्दमनुभवामीति भावः ।

अत्र भावाभिमानिनो वाच्या गुणोत्प्रेक्षा, तथा शीतलत्वं प्रति स्नेहार्द्रत्वपदार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गं, तथा स्पर्शरूपाधारसभावेऽपि आनन्दजननक्रियारूप-तदाधेयसद्भावात् विशेषश्च अलङ्कारः, एतेषामङ्गाङ्गिभावेन सङ्करः ॥१४॥

(त) सीतेति । अगाधम् अनन्तं यथा स्यात्तथा दर्शितः स्नेहसम्भारः प्रणयातिशयो यैस्ते तथोक्ताः, आनन्दनिष्यन्दिनः सुखस्राविणः सुखकर्त्तृका इत्यर्थः उल्लापा उच्चैर्विलापाः । येषां उल्लापानां प्रत्ययेन विश्वासेन, यदेव एते उल्लापाः श्रुतिसुखकरा

---

(१) अद्यत्वं वार्द्रयति इति पाठान्तरम् ।

रामः। अथवा कुतः प्रियतमा, नूनं सङ्कल्पाभ्यासपाटवोपा-दान (१) एष रामस्य भ्रमः। (थ)

नेपथ्ये। प्रमादः प्रमादः। सीतादेव्याः स्वकरकलितैरित्यर्द्धं पठ्यते। (द)

रामः। सकरुणौत्सुक्यं। किं तस्य?।

पुनर्नेपथ्ये। वध्वा सार्द्धमित्युत्तरार्द्धं पठ्यते।

सीता। को दाणिं णिउज्जिस्सदि।*। (ध)

(ध) क इदानीं नियोक्ष्यते।

भविष्यन्तीति विश्वासिनीत्यर्थः; निष्कारणपरित्याग एव शल्यं शङ्कुः तज्जातमस्येति स तथोक्तः जन्मलाभः बहुमतः श्लाघ्यतया मन्यत इत्यर्थः। एते आर्य्यपुत्रस्य उल्लापा ईदृशो मे प्रियाः, यदेषां निकटे अकारणपरित्यागदुःखं तुच्छं मन्यत इति भावः।

(थ) राम इति। महारण्ये निर्वासनेन मृतायाः सीताया अवागमनसम्भावना नास्त्ये-वेति विवेकोदयादाह अथवेति। सङ्कल्पः सीता अवास्ति एवञ्च ब्रवीति इत्यादिमनोवृत्तिः, तस्य अभ्यासेन पौनः पुन्येन यत पाटवं नैपुण्यं, सीता अवास्ति एवञ्च ब्रवीतित्यादि-धारणायाः सर्वदाकरणपटुत्वमित्यर्थः तदेव उपादानं कारणं यस्य स तथोक्तः। असौ भ्रान्तिरिति नूनं निश्चयः। सर्वदैव सीतायाश्चिन्तया प्रायेण सर्वत्र तां प्रपश्यामीति भ्रमो जायत इति सरलार्थः।

(द) नेपथ्य इति। प्रमादशब्दस्यार्थः पूर्वमेव निरूपितः। पठ्यते वासन्त्या तिशेषः। एवं परत्रापि बोध्यम्।

(ध) सीतेति। इदानीं सहायशून्यावस्थानसमये, कोजनः नियोक्ष्यते मत्पुत्रक करिकरभकसाहाय्यार्थं प्रेष्यते भवेति शेषः। तस्य साहाय्यार्थं कमपि प्रेरयितुं न शक्नोमि सहाद्दुःखमेतदिति भावः।

---

(१) पाटवोत्पाद इति पाठभेदः।

*। अहिउज्जिस्सदि इति पाठान्तरम्। अभियोक्ष्यत इति तदनुवादः।

रामः । क्वासौ दुरात्मा, यः प्रियायाः पुत्रकं वधूद्वितीय-मभिभवति । इत्युत्तिष्ठति । (न)

प्रविश्य सम्भ्रान्ता वासन्ती । कथं देवी रघुनन्दनः । (प)

सीता । कहं पिअसही मे वासन्ती । (फ)

वास । जयति जयति देवः !

रामः । निरूप्य । कथं देव्याः प्रियसखी वासन्ती । (ब)

वास । देव ! त्वर्य्यतां त्वर्य्यतां, इतो जटायुगिरिशिखरस्य दक्षिणेन सीतातीर्थेन गोदावरीमवतीर्य्य सम्भावयतु देव्याः पुत्रकं देवः । (भ)

(फ) कथं प्रियसखी मे वासन्ती ।

(न) राम इति । क वर्त्तत इति शेषः । वधूर्भार्य्या काचित् हस्तिनी, द्वितीया ययोः संख्ययोः पूरणी सहचारिणीति यावत् यस्य तं वध्वा सह विहरन्तमित्यर्थः अभिभवति आक्रामति । तमहं गत्वा व्यापादयामीति भावः । उत्तिष्ठति साहाय्य-करणाय गन्तुमित्यर्थः ।

अत्र द्वितीया सहधर्म्मिणी त्यमरकोषात् वधूद्वितीयेत्यर्थकशब्दद्वयमाश्रित्य आपा-ततः पुनरुक्तत्वप्रतीतिः परन्तु द्वितीयशब्दनिश्चयेन तस्य द्वित्वसंख्यापूरणार्थत्वावगमात् पुनरुक्तवदाभासोऽलङ्कारः ।

(प) प्रविश्येति । सम्भ्रान्ता आक्रान्तसीतापुत्रक-करिकलभस्य रक्षणार्थमाशया अस्थिरचित्ता । कथमिति निर्णयाश्चर्य्यसूचकमव्ययम् ।

(भ) वासीति । त्वर्य्यतां त्वरा क्रियतां सत्वरं गम्यतामित्यर्थः । सम्भ्रमे द्विर्वचनं । सत्वरं गत्वा मया किं कर्त्तव्यमित्याह इत इति । इतः स्थानात् । जटायोर्गिरिशिखरं जटायुना भूष्यु षितपूर्वं पर्वतमस्तकमित्यर्थः तस्य दक्षिणेन दक्षिणदिग्वर्त्तिना सीता-यत्नार्थं जलावतारो घट्ट इति यावत् तेन, येन घट्टेन सीता जलादिमानेतुं गोदावरीं

सीता । हा ताद ! जटाऊ ! सुण्णं तुए विणा जणट्ठाणं । (म)

रामः । अहह ! हृदयमर्म्मच्छिदः खल्वमी कथोद्घाताः । (य)

वासन्ती । इत इतो देवः । (र)

सीता । भअवदि ! सच्चं एव्व वणदेवदावि मं ण पेक्खदि ।

रामः । अयि वत्से ! सर्व्वदेवताभ्यः प्रकृष्टमैश्वर्य्यं भागीरथी-देव्याः तत् किमाशङ्कसे । (व)

(म) हा तात ? जटायो ! शून्यं त्वया विना जनस्थानं ।

(ल) भगवति ! सत्यकमेव वनदेवतापि मां न प्रेक्षते ? ।

गतवती तेन यद्देनेत्यर्थः । अवतीर्य्य प्रविश्य । देव्याः पुत्रकं सीतायाः कनकपुत्रं सं करिशावकं सम्भावयतु साहाय्यकरणेन प्रीणयतु, देवी राजा भवान् ।

जटायुश्च जटायुषा इति द्विरूपकोषः । तीर्थं जलावतारे योनौ चेत्यजयः ।

(म) सीतेति । श्वशुरमित्रत्वेन जटायुषः तात इति सीतया सम्बोधनं कृतं । शून्यं शून्यमिव ।

(य) राम इति । कथानां जटायुगिरिशिखर-सीतातीर्थ-गोदावरी-देवीपुत्रकपदानां उद्घाताः उच्चारणानि, हृदयमर्म्मच्छिदः तत्तत्पूर्व्ववृत्तान्तस्मारकत्वेन शोकोदयजननात् हृदयविदारका इत्यर्थः ।

(र) वासेति । देवो भवान्, इतः इतः अस्मादस्मात् स्थानात् आगच्छत्विति शेषः ।

(ल) सीतेति । समीपवर्त्ती रामः, समागता वनदेवता वासन्ती च कथमप्यालापाकरणात् आत्मानं न पश्यतीति प्रत्यक्षं कृत्वा आश्चर्य्यान्विता सीता तमसां पृच्छति भगवतीति । सत्यकमिति स्वार्थे कः ।

(व) रामेति । भागीरथीदेव्या गङ्गाया ऐश्वर्य्यं अणिमादिशक्तिः सर्व्वदेवताभ्यः प्रकृष्टं प्रवलं, तत् तस्मात् किं कथं आशङ्कसे अन्यो द्रक्ष्यतीत्याशङ्कां करोषीत्यर्थः ।

सीता । तदो अणुसरह्म । इति परिक्रामतः । (श)

रामः । (परिक्रम्य) भगवति ! गोदावरी ! नमस्ते ।

वासः । निरूप्य । देव ! देव ! मोदस्व विजयिना वधू द्वितीयेन देव्याः पुत्रकेन । (ष)

रामः । विजयतामायुष्मान् ।

सीता । अह्महे ! ईदिशो एसो संवुत्तो । (स)

(श) ततोनुसराव: ।

(स) अहो ! ईदृश एष संवृत्त: ।

उत्कृष्टैश्वर्यशालिन्या गङ्गाया वरप्रभावेण निकृष्टैश्वर्यशालिनी वनदेवता त्वां द्रष्टुं न शक्नुयादिति त्वं यथेच्छं विचरितुमर्हसीति भावः ।

ऐश्वर्यञ्च अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ।

ईशित्वञ्च वशित्वञ्च तथा कामावशायिता ,

अणिमा अनुभावः, यतः शिलामपि प्रविशति । लघिमा लघुभावः यतः सूर्यमरीचीनालम्ब्य सूर्यलोकं याति । महिमा महतो भावः यतो महान् भवति । प्राप्तिरङ्गुल्यग्रेण स्पृशति चन्द्रं । प्राकाम्यमिच्छानभिघातः यतो भूमावुन्मज्जति निमज्जति यथोदके वशित्वं भूतभौतिकं वशीभवत्यवश्यं । ईशित्वं भूतभौतिकानां प्रभवव्यूहव्ययानामीष्टे । यत्र कामावसायित्वं सत्यसङ्कल्पता, यथास्य सङ्कल्पो भवति भूतेषु तथैव भूतानि भवन्ति । इति सांख्यतत्त्वकौमुद्यां वाचस्पतिमिश्राः । तत्र कामावसायितारूपैश्वर्येण वरप्रदानादिकमिति बोध्यम् ।

(श) सीतेति । ततस्तस्मात् निःसंशयादृश्यत्वात् अनुसरावः पश्चात् गच्छावः, आवां आर्य्यपुत्रवासन्त्याविति शेषः । परिक्रामतः सीतातमसे इति शेषः ।

(ष) वासेति । निरूप्य निश्चयेनावलोक्य । देव देवेति हर्षेद्विरुक्तिः । मोदस्व आनन्दितो भव । सीतायाः कृतकपुत्रेण करिशावकेन उद्दामदर्प्तिपरागजग्रहणादिति भावः ।

रामः। देवि! दिष्ट्या वर्द्धसे। (ह)

येनोद्गच्छद्बिसकिसलयस्निग्धदन्ताङ्कुरेण
व्याकृष्टस्ते सुतनु! लवलीपल्लवः कर्णपूरात् (१)।
सोऽयं पुत्रस्तव मदमुचां वारणानां विजेता
यत् कल्याणं वयसि तरुणे भाजनं तस्य जातः ॥१५॥

(ह) राम इति। दिष्ट्या भाग्येन वर्द्धसे वृद्धिं प्राप्नोषि सम्पद्युक्तासीत्यर्थः। अप्रत्यक्षामपि सीतामुद्दिश्य रामस्योक्तिरियं।

वृद्धिं प्रति हेतुमाह येनेति। शोभना सुन्दरी तनुर्यस्याः तत्सम्बोधनं। उद्गच्छन्तौ उत्तिष्ठन्तौ बिसकिसलयवत् मृणालाग्रभागवत् स्निग्धौ कोमलौ दन्ताङ्कुरौ यस्य तेन तथोक्तेन येन करिशावकेन ते तव कर्णपूरात् कर्णालङ्कारात् कर्णाभरणमध्यादित्यर्थः लवल्याः वृक्षविशेषस्य (लोयाड़ि, लोयाइल इति प्रसिद्धस्य) पल्लवः व्याकृष्टः शुण्डया आकृष्य नीतः। शैशवीयकोमलशरीरस्वभाव आसीदिति भावः। अयं दृश्यमानः स तव पुत्रः करिशावकः मदमुचां दानजलस्राविणां महाबलवतामिति भावः वारणानां हस्तिनां विजेता जात इति शेषः। अतएव तरुणे वयसि यौवने काले यत् कल्याणं महाबलवत्त्वेन शत्रुनिराकरणात् मङ्गलं स्यात् प्राणिनामिति शेषः तस्य कल्याणस्य भाजनं पात्रं जातः महाबलवान् भूत इत्यर्थः।

अत्र प्रथमचरणे लुप्तोपमा, तथा चतुर्थचरणार्थं प्रति तृतीयचरणवाक्यार्थो हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गञ्च अनयोरङ्गाङ्गिभावेन सङ्करः।

सुतनु इति स्त्रियां मूर्त्तिस्तनुस्तनूरित्यमरोक्तदीर्घान्ततनूशब्दस्य सम्बुद्धौ ह्रस्वः। उद्देश्यविधेययोरुद्देश्यवचनत्वमाख्यातस्येति काशिकाप्रामाण्यात् जात इत्यत्र पुंस्त्वं आख्यातस्य प्रधानक्रियाया इति तदर्थः।

मन्दाक्रान्ता वृत्तं ॥१५॥

सीता । अविउत्तो दाणिं अअं दीहाउ इमाए सोम्म दंसणाए होदु । [ख)

रामः । सखि ! वासन्ति ! पश्य पश्य, कान्तानुवृत्तिचातुर्य्यमप्यनुशिक्षितं वत्सेन । (क)

लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पादिताः*
पुष्यत्पुष्करवासितस्य (१) पयसो गण्डूषसंक्रान्तयः ।

(ख) अवियुक्त इदानीमयं दीर्घायुरनया सौम्यदर्शनया भवतु ।

(ख) सीतेति । अयं दीर्घायुः दीर्घकालजीवी मम पुत्रकः अनया दृश्यमानया सौम्यदर्शनया प्रियदर्शनया स्वभार्य्यया करिण्या त्यर्थः अवियुक्तः अविच्छिन्नः चिरमेकया वर्त्तित इति यावत् । दम्पत्योर्विरहजन्यं परस्परदुःखं जगति सर्वदुःखेभ्यो दारुणमिति स्वयमनिशमनुभवन्ती सीता, तत् दुःखं यथा पुत्रस्य पयोस्तयोः करिकरिण्योर्न स्यात् तथाऽभिसन्धाय आशीर्वादान्तरमकृत्वा चिरसंयोगाशीर्वादं कृतवतीति बोध्यम् ।

(क) राम इति । कान्ताया भार्य्याया अनुवृत्ती अनुनये सन्तोषोपयोगीति तात्पर्य्यं यत् चातुर्य्यं नैपुण्यं तत् वत्सेन करिशावकेन अनुशिक्षितं शिक्षया लब्धम् । एतेन सीताया अभावेन तदनुवृत्तिकरणासामर्थ्यात् रामस्य मनसि दारुणं दुःखमिति व्यज्यते ।

पश्य पश्येति विस्मये द्विर्वचनं ।

कथमेतज् ज्ञायत इत्याह लीलेति । यत् यस्मात् स्नेहात् प्रणयवशात् लीलया अवहेलया अनायासेनेति यावत् उत् खाता उत्पाटिता ये मृणालकाण्डाः मृणालस्तम्बा तेषां कवलच्छेदेषु ग्रासार्थखण्डेषु करिणीमुखवर्त्तिष्वित्यर्थः, पुष्यद्भिः प्रस्फुटितैः पुष्करैः पद्मैः सेवा वासितस्य सुगन्धीकृतस्य पयसो जलस्य गण्डूषाणां मुखपूरणानां संक्रान्तयः सञ्चाराः सम्पादिताः कृताः करिणीमुखवर्त्तिषु मृणालकवलेषु निजमुखपूरितं जलं वेगेन विक्षिप्तमित्यर्थः । तथा शीकरिणा जलबिन्दुशालिना करेण शुण्डा-

* सम्पातिता इति पाठान्तरम् । (१) पुष्यत्पुष्कर इति पाठभेदः ।

सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्यत् स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम् ॥ २६ ॥

सीता । भअवदि ! तमसे ! अअं दाव ईदिसो जादो, ते उण ण आणामि कुशलवा एत्तिकेण कालेण कीदिसा विअ होन्ति । (ख)

(ख) भगवति ! तमसे ! अयं तावदीदृशो जातः, तौ पुनर्न जानामि कुशलवौ एतावता कालेन कीदृशाविव भवतः ।

परिसेचनं कामं पर्य्याप्तं यथास्यात्तथा विहितः कृतः ; पुनः ततः परमित्यर्थः विरामे सेकावसाने अनरालं अवक्रं सरलं नालं यस्य तादृशं यत् नलिनीपत्रं पद्मपत्रं तदेव आतपत्रं छत्रं धृतं गुण्डादण्डेन करिण्या गात्रोपरि गृहीतमित्यर्थः । एभिर्व्यापारैः कान्तानुवृत्तिचातुर्य्यशिक्षा सुव्यक्तैवेति भावः ।

अत्र स्वभावोक्तिरलङ्कारः, तथा नलिनीपत्रातपत्रमिति निरङ्गं केवलं रूपकञ्च—त्यनयोरङ्गाङ्गिभावेन सङ्करः ; तथा छेकानुप्रासवृत्त्यनुप्रासयोश्च संसृष्टिः । मधु द्विरेफः कुसुमैकपात्रे इत्यादिवदत्र तिर्य्यग्जातिगतत्वात् शृङ्गाररसाभासः ।

काण्डः स्तम्बे तरुस्कन्धे वाणावसरयोरपीति मेदिनी । गण्डूषः । सुखपूरणमिति शब्दकल्पद्रुमः । शीकरोऽम्बुकणः स्मृतः । कामं प्रकामं पर्य्याप्तं निकामेष्टं यथेप्सितं अरालं कुटिलं वक्रमिति चामरः ।

शार्दूलविक्रीड़ितं वृत्तम् ॥२६॥

(ख) सीतेति । अयं कृतकपुत्रः करिशावकः, ईदृशो यौवनोचितवृद्धिबलवान् कीदृशाविव यौवनोचितवृद्धिबलशालिनौ तदशालिनौ वा इति न जानामीत्यर्थः ।

अत्र न जानामीति वाक्यस्य तौ पुनरित्यादिवाक्यान्तरे प्रवेशादपि सीतायाः स्नेहो-दयेन व्याकुलीभूतत्वात् दिङ्मातङ्गघटेत्यादिसाहित्यदर्पणोदाहृतवत् न गर्भि-तत्वदोषः ।

तम। यादृशोऽयं तादृशौ तावपि। (ग)

सीता। ईदिसो अहं मन्दभाइणी, जाए ण केवलं णिरन्तरं अज्जउत्तविरहो पुत्तविरहोवि (घ)

तम। भवितव्यतेयमीदृशी। (ङ)

सीता। किंवा मए पसूदाए, जेण तादिसंपि मम पुत्तकाणं ईसिविरलकोमलधवलदसणुज्जलकवोलं अणुबद्ध-मुद्ध-काअलि-विहसिदं णिबद्धकाअसिहण्डअं अमलमुहपुण्डरीअजुअलं ण परिचुम्बिदं अज्जउत्तेण। (च)

(घ) ईदृशी अहं मन्दभागिनी, यस्या न केवलं निरन्तरमार्य्यपुत्रविरहः पुत्रविरहोऽपि।

(च) किंवा मया प्रसूतया, येन तादृशमपि मम पुत्रकयोः ईषद्विरलकोमलधवलदशनोज्ज्वलकपोलं अनुबद्धमुग्धकाकलीविहसितं निबद्धकाकशिखण्डकममलमुख-पुण्डरीकयुगलं न परिचुम्बितमार्य्यपुत्रेण।

(ग) तमेति। अयं करिशावकः यादृशो यौवनोचितशरीरपुष्टिबलशाली जातः तावपि कुशलवौ तादृशौ शरीरपुष्टिबलशालिनौ जातावित्यर्थः। कालेन वृद्धिबलयोः समानत्वादिति भावः।

(घ) सीतेति। विरहो वियोगः। पतिपुत्रयोर्बहुकालविरहादेव अहं मन्दभागिनीति भावः।

(ङ) तमेति। इयं त्वया अनुभूयमाना ईदृशी पतिपुत्रयोर्विरहकारिणी भवितव्यता भाग्यम्। दुरदृष्टेनैव तवायं पतिपुत्राभ्यां विरहः कृतः न तु केनचिन्मनुष्येणेति न शोचनीय इति भावः।

भवितव्यता। भाग्यमिति शब्दकल्पद्रुमः।

(च) सीतेति। प्रसूतया प्रसवकारिण्या कर्त्तरि क्तः। मम पुत्रयोः प्रसवो निष्फल

तम। अस्तु देवताप्रसादात्। (क)

सीता। भअवदि! तमसे! एदिणा अपच्चसंसुमरणेण उस्ससिदपण्हुदत्थणी ताणं अ पिदुणो सण्णिधाणेण खणमेत्तं संसारिणी ह्मि संवुत्ता। (ज)

(ज) भगवति। तमसे! एतेन अपत्यसंस्मरणेन उच्छ्वसितप्रस्नुतस्तनी, तयोश्च पितुः सन्निधानेन क्षणमात्रं संसारिणी अस्मि संवृत्ता।

इत्यर्थः। येन हेतुना, ईषद्विरला: नातिसंश्लिष्टाः कोमलाः मृदुलाः नवोद्गतत्वादनतिकठिना इत्यर्थः धवलाः श्वेतवर्णाः ये दशना दन्तास्तैः तत्प्रभाभिरित्यर्थः उज्ज्वलौ चिक्कणौ कपोलौ गण्डौ यस्य तत्तथोक्तं, तथा अनुबद्धं अनुसृते कृते इत्यर्थः काकली अस्पष्टमधुरः शब्दः विहसितं मधुरहास्यञ्च ते येन तत् तथोक्तं, तथा निबद्धौ धृतौ काकशिखण्डकौ काकपक्षौ (जुल्पी इति प्रसिद्धौ) येन तत् तथोक्तं, अमलमुख-पुण्डरीकयोः निष्कलङ्कमुखपद्मयोर्युगलं द्वयं आर्य्यपुत्रेण पत्या रामेण न परिचुम्बितम्। पत्युः स्नेहेन लालनादिना च सन्तानप्रसवः सफल इवानुभूयते, मम पुत्रयोस्तु तदभावात् प्रसवो निष्फल इव प्रतिभातीति भावः।

रदना दशना दन्ताः। काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे इति चामरः। शिखण्डकः। (पुं) काकपक्षः। जुलपी इति भाषा। इति शब्दकल्पद्रुमः।

(क) तमेति। देवतानां प्रसादादनुग्रहात्, अस्तु रामेण तव पुत्रयोर्मुखपद्मं चुम्बितं भवतु इत्याशीर्वादः।

(ज) सीतेति। एतेन इदानीन्तनेन, अपत्ययोः पुत्रयोः संस्मरणेन चिन्तया उच्छ्वसितौ दुग्धागमेन स्फीतौ प्रस्नुतौ दुग्धं स्रवन्तौ स्तनौ यस्याः सा तथोक्ता, तयोरपत्ययोः पितुरार्य्यपुत्रस्य रामस्य। क्षणमात्रं एतत्समयमात्रं संसारिणी गृहस्था। पति-पत्नीपुत्राणां यथासम्भवम् एकत्रावस्थानं हि गार्हस्थ्यं तदद्य मे प्रायेण जातमिति भावः। सीताया गभीरविषादाभिव्यञ्जकोक्तिरियम्।

राम। किमत्रोच्यते, प्रसवः खलु प्रकर्षपर्य्यन्तः स्नेहस्य परस्त्वेतदन्योन्यसंश्लेषणं पित्रोः। (भ)

अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात्।

न पतति वंशो येन जातेन तदपत्यमिति कलापटीकायां दुर्गः।

(भ) रामेति। सीतया अपत्यसंस्मरणेनेत्यनेन पुत्रस्नेहस्य द्योतनात् तत् समर्थयितुमाह किमिति। अत्र अपत्यस्नेहविषये किमुच्यते मयेति शेषः, किं वक्तव्यमस्तीत्यर्थः; प्रसवः अपत्यं खलु निश्चितं स्नेहस्य वात्सल्यस्य, यः प्रकर्षः उत्कर्षः आधिक्यमिति यावत् तस्य पर्य्यन्तः शेषसीमा ; पुत्रस्नेहादधिकः स्नेहो जगति नास्तीत्यर्थः। एतन्मतस्य सर्ववादिसिद्धत्वात् एतत्समर्थनाय किमपि वक्तव्यं नास्तीति भावः। परन्तु अन्यत्र ब्रवीमीत्यर्थः, किन्तदित्याह; एतत् एष प्रसवः पित्रोः मातापित्रोः अन्योन्यं संश्लिष्यते परस्परं स्नेहेन योज्यते इत्यन्योन्यसंश्लेषणं अपत्यं स्नेहबन्धनेन पित्रोर्गाढयोजकमित्यर्थः।

उक्तार्थमेव विशेषयन्नाह अन्तरिति। दम्पत्योः पतिपत्न्योः अन्तःकरणतत्त्वस्य मनःपदार्थस्य स्नेहसंश्रयात् परस्परं प्रति परस्परप्रणयसम्बन्धात् अपत्यमिति सन्तानरूपः आमिकः अद्वितीयः सर्वोत्तम आनन्दग्रन्थिः सुखमयग्रन्थिः बध्यते विधीयते इति शेषः। दम्पत्योरनपत्यदशायां उभयोर्मन उभयत्रैव तिष्ठति, अपत्ये जाते तु तस्य रक्षणावेक्षणादिसकलतत्त्वावधानाय सन्तानमेव तन्मिलितमपत्ये स्थितं सत् मीलितं भवति, तदपत्यञ्च सर्वदैवानन्दजनकमिति यथा पृथक्स्थानस्थं किमपि वस्तुद्वयं एकत्र संयोज्य केनचित् सूत्रेण बध्यते तथा मातापित्रोर्मनः सन्तानेन संयोज्य बध्यत इति वा सरलार्थः।

अत्र अपत्ये आनन्दग्रन्थित्वारोपस्य प्रकृतस्नेहोत्कर्षप्रतिपादनोपयोगितया तुल्याधिकरणः परिणामालङ्कारः।

दम्पत्योर्दुश्चरित्वादिना परस्परस्नेहसम्बन्धाभावे जातमप्यपत्यं तयोर्मनःसंयोजकं न भवतीति प्रदर्शनाय स्नेहसंश्रयादित्युक्तम्।

आनन्दग्रन्थिरेकोऽयमपत्यमिति बध्यते ॥१७॥

वास । इतोऽपि देवः पश्यतु । (ञ)

अतरुणमदताण्डवोत्सवान्ते
स्वयमचिरोद्गतमुग्धलोलबर्हः (१) ।

परस्परेत्यादि गद्यस्थमेतत्पदं पद्यस्थमेकपदं अयं पदस्य य आधारस्तदधिकरणमितिवत् प्रक्रं स्वमानलिङ्गं ।

जाया च पतिश्चेति द्वन्द्वे पृषोदरादित्वात् जायाशब्दस्य दमादेशः । अपत्यमितीत्यत्र इतिशब्दः दशरथ इत्युदाहृत इत्यादिवत् स्वरूपाविर्भावकः ।

अन्तःकरणं । मन इति शब्दकल्पद्रुमः । किन्तु अस्य कार्यभेदात् वैविध्यमाह सांख्यकारिका —

अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् ।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणं ॥

अन्तःकरणं त्रिविधं बुद्धिरहङ्कारोमन इति शरीराभ्यन्तरवर्त्तित्वादन्तःकरणमिति सांख्यतत्त्वकौमुदी । वेदान्तिनस्तु चातुर्विध्यमाहुः, यथा—

मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरं ।
संशयोनिश्चयो गर्वः स्मरणं विषया अमी । इति वेदान्तकारिका ।

तत्त्वं । वस्तु इति शब्दकल्पद्रुमः ।

तमसाया अपि प्रभावातिशयादभिप्रेतजनं विना अन्यो वाक्यं न शृणोतीति बोध्यम् ॥१७॥

(ञ) वासेति । देवो रामः । इतोऽपि अस्यामपि दिशि ।

अतरुणेति । स्वयमात्मनैव नतु कस्यचित् चेष्टयेत्यर्थः अचिरोद्गतं यौवनारम्भात् नवोत्पन्नं मुग्धं सुन्दरं लोलं चञ्चलञ्च बर्हं पुच्छं यस्य स तथोक्तः, तथा उत्पन्ना शिखा चूडा यस्य स उच्छिखः, अत एव मणेर्मुकुटं यस्य सः, मणिमयमुकुटधारीव

---

(१) अनुदिवसमवर्द्धयत् प्रिया ते यमचिरनिर्गतमुग्धलोलबर्हं । इति पाठान्तरम् ।

मणिमुकुट इवोच्छिखः कदम्बे
नदति स एष बधूसखः शिखण्डी ॥१८॥

सीता । सकौतुकास्रम् । एसो सो, एसो सो । (ट)

राम । वत्स ! मोदस्व, वयमद्य वर्त्तामहे । (ठ)

सीता । एव्वं भोदु । (ड)

(ट) एष सः, एष सः

(ड) एवं भवतु ।

अथवा उच्छिखः उद्गतप्रभापटलः मणिमुकुटः मणिमयकिरीट इव प्रतीयमान इत्यर्थः वध्वा भार्य्यायाः सखा सहचरः, एष दृश्यमानः, स सीतया पोषितपूर्वः शिखण्डी मयूरः अतरुणमदेन अनल्पहर्षेण यत्ताण्डवोत्सवः नृत्योत्सवः तस्य अन्ते अवसाने नदति शब्दायते । मधुरस्वभावोयं वर्णितः ।

अत्र वाच्या भावाभिमानिनी उत्प्रेक्षाऽलङ्कारः द्वितीयार्थे तूपमालङ्कारः । तथा तरुणशब्दस्य युवके रूढत्वादवतु रूढिप्रयोजनाभावेऽपि लक्षणया अल्पार्थप्रतिपादनात् नेयार्थत्वदोषः, स च सुबहुलेति पाठेन समाधेयः ।

ताण्डवं नटनं नाट्यं । पिच्छवर्हे नपुंसकं । इति चामरः । शिखण्डी मयूरः इतिशब्दकल्पद्रुमः ।

पुष्पिताग्रावृत्तं अयुजि नयुगरेफतोयकारो युजि च न जौ जरगाश्च पुष्पिताग्रा इति लक्षणात् ॥१८॥

(ट) सीतेति । एष दृश्यमानः, स मया पोषितपूर्वोमयूरः । हर्षे द्विर्वचनं

(ठ) राम इति । मोदस्व आमोदं कुरु । केनेत्याह वयमिति । वर्त्तामहे विद्यमानाः स्मः । स्निग्धजनसन्निधानसमय एव आमोदप्रकाशस्य प्रकृतोऽवसर इति भावः ।

(ड) सीतेति । एवं मयूरस्यामोदप्रकाश इत्यर्थः ।

रामः। भ्रमिषु कृतपुटान्तर्मण्डलावृत्ति चक्षुः
प्रचलितचतुरभ्रूताण्डवैर्मण्डयन्त्या।
करकिसलयतालैर्मुग्धया नर्त्यमानं
सुतमिव मनसा त्वां वत्सलेन स्मरामि ॥१८॥

हन्त! तिर्य्यञ्चोऽपि परिचयमनुरुध्यन्ते। (ढ)
कतिपयकुसुमोद्गमः कदम्बः
प्रियतमया परिवर्द्धितो य आसीत्।

भ्रमिष्विति। भ्रमिषु घूर्णनेषु चक्राकारेण मयूरस्य भ्रमणेषु सत्स्वित्यर्थः कृता पुटयोः नेत्रावरणचर्म्मणोः अन्तर्मध्ये मण्डलावृत्तिः वर्त्तुलाकारेण भ्रमणं येन तत् तथोक्तं, चक्षुः स्वकीयं (सीतायाः) नेत्रं प्रचलिते चञ्चले चतुरे इङ्गितादिकरण निपुणे ये भ्रुवौ तयोः ताण्डवैः नृत्यैः कम्पनैरिति यावत् मण्डयन्त्या भूषयन्त्या परिभ्रमणसमये मयूरो यस्यां यस्यां दिशि याति तस्यां तस्यां दिशि नयनं पातयन्त्येत्यर्थः। मुग्धया सुन्दर्य्या सीतया करौ पाणी किसलये पल्लवे इव तयोस्तालैः नृत्यगीतयोरंशविशेषव्यवच्छेदसूचकैः उभयपाणितलसवेगसंघर्षजनितशब्दैरित्यर्थः सुतं पुत्रमिव नर्त्यमानं कारितनृत्यं त्वां वत्सलेन स्नेहवता मनसा अहं स्मरामि। सीतायाः कृतकपुत्रस्त्वं ममापि पुत्र इति वात्सल्येन तव तन्नृत्यस्मरणमिदानीं मम जायत इति भावः।

अत्र लुप्तोपमोपमयोरङ्गाङ्गिभावेन सङ्करः। राघवानन्दमहापात्रमते स्मरणालङ्कारोऽपि।

मालिनीवृत्तं ॥१८

(ढ) हन्तेति। हन्त हर्षे। तिर्य्यञ्चोऽपि मनुष्येतरप्राणिनोऽपि परिचयं विशेषेण ज्ञानं अनुरुध्यन्ते अनुसृत्य वर्त्तन्ते इत्यर्थः। मयूरोऽयं पक्षिजातिरपि सन् मदस्माकं पूर्वपरिचयानुसारेण इदानीमपि व्यवहरति तन्महदाश्चर्य्यमिति भावः।

सीता । निरूप्य सास्रम् । सुठ्ठु पच्चभिजाणिदं अज्जउत्तेण ।(ण)

रामः । स्मरति गिरिमयूर एष देव्याः

स्वजन इवात्र यतः प्रमोदमेति ॥२०॥

वास । अत्र तावदासनपरिग्रहं करोतु देवः । (त)

एतत्तदेव कदलीवनमध्यवर्त्ति

कान्तासखस्य शयनीयशिलातलं ते ।

(ण) सुष्ठु प्रत्यभिज्ञातमार्य्यपुत्रेण ।

परिचयानुसारेण व्यवहारस्य इत्यन्तरमाह कतिपयेति । प्रियतमया सीतया कतिपयानां कियतां कुसुमानां उद्गम उत्पत्तिर्यस्मिन् स तथोक्तः नातिक्षुद्र इत्यर्थः यः कदम्बः तदाख्यवृक्षः परिवर्द्धितः आलवालजलसेचन-मूलपरिष्कारकरणादिना वृद्धिं प्रापित आसीत् । एष दृश्यमानः देव्या गिरिमयूरः सीतायाः कृतकपुत्रः पार्वत्यमयूरः स्मरति तं कदम्बमिति शेषः । कथं स्मरतीति ज्ञायत इत्याह यतो यस्मादत्र तौः अत्र कदम्बवृक्षे स्वजने बान्धवे इव प्रमोदमेति आनन्दमनुभवति । एकया सीतया एतौ मयूरकदम्बवृक्ष परिपालितौ सुतरामेतौ परस्परं भ्रातराविव तदानीमास्तां अत एवेदानीमपि एष मयूरः तत्परिचयवशेन अस्मिन् कदम्बवृक्षे वसन्नानन्दमनुभव-तीति कथमन्यथा इदानीमपि एष मयूरः स्थानान्तरमपहाय बाहुल्येनास्मिन् कदम्बवृक्षे वसतीति भावः ।

अलोपमाऽलङ्कारः ।

पुष्पिताग्रावृत्तम् ॥२०॥

(ण) सीतेति । निरूप्य स एवायं कदम्ब इति दृष्टिपातेन निश्चित्य । तत्-कालीनसुखस्मरणेन शोकोदयात् सास्रमित्युक्तं ।। सुष्ठु सम्यक्, प्रत्यभिज्ञातं स एवायमिति कृत्वा निश्चितमित्यर्थः । स एवायं कदम्ब इति सत्यमेवेति भावः ।

(त) वासेति । तावत् पदमवधारणे, अलं वेत्यर्थः । देवो भवान् रामः ।

अत्र स्थिता तृणमदाद्बहुशो यदेभ्यः
सीता, ततो हरिणकैर्न विमुच्यते स्म ॥२१॥

रामः। इदं तावदशक्यमेव द्रष्टुम्। इत्यन्यतो रुदन् प्रविशति। (थ)

सीता। सहि! वासन्दि! किं तुए किदं अज्जउत्तस्स मम अ एदं दंसअन्तीए। हद्धी! हद्धी! सो ज्जेव अज्जउत्तो, तं ज्जेव पञ्चवटीवणं, सा ज्जेव वासन्दी, ते ज्जेव विविहविस्सम्भसाक्खिणो

(द) सखि! वासन्ति! किं त्वया कृतं आर्य्यपुत्रस्य मम च एतद्दर्शयन्त्या। हा धिक् हा धिक्! स एवार्य्यपुत्रः, तदेव पञ्चवटीवनं, सैव वासन्ती, त एव विविधविस्रम्भ

एतदिति। कदलीवनमध्यवर्त्ति, एतत् दृश्यमानं तदेव पूर्व्वव्यवहृतमित्र कान्तासखस्य प्रियरहश्चारिणः सीतया सहितस्येत्यर्थः ते तव शयनीयशिलातलं शय्याभूतः पा षाणः विद्यत इति शेषः। यत् यस्मात् सीता अत्र शिलातले स्थिता सती एभ्यो हरिणकेभ्यः बहुशो बहुवारं तृणं भक्षणाय घासमदात् अर्पितवती, ततः तस्मात् कारणात् हरिणकैः न विमुच्यते स्म एतत् शिलातलं न परित्यक्तं, अद्यापि गाढप्रतृणलासस्नेहेनात्रैव वसन्तीति भावः।

"सखा।···सहाय" इति शब्दकल्पद्रुमः।

कान्तायाः सखेति कान्ता सखः "राजन्नहन् सखी" ति राजादित्वादत्। शीङोऽस्मिन्निति शयनीयं "कृत्ययुटोऽन्यत्रापी" त्यधिकरणे युट्। हरिणकैरित्यनुकम्पायां कप्रत्ययः।

वसन्ततिलकावृत्तम् ॥ २१ ॥

(थ) राम इति। तावद्वाक्यालङ्कारे। इदं शिलातलं द्रष्टुं अशक्यमेव मयेति शेषः; अस्य शिलातलस्य सीताया सह तत्कालकृतमकलव्यवहाराणां स्मारकत्वेन दारुणशोककारणत्वादिति भावः। अन्यतः अन्यस्मिन् स्थाने।

(द) सीतेति। किं त्वया कृतं का अवस्था कृता, एतत् शिलातलं दर्शयन्त्या त्वया आवयोर्महाशोकार्त्तत्वमेव कृतमित्यर्थः अत कृततत्तद्व्यापारस्मरणादिति भावः।

गोदावरीकाणणुद्देसा ते ज्जेव जादणिव्विसेसा मिअपक्खिपादवा, सा ज्जेव चाहं, मम उण मन्दभाइणीए दीसन्तं वि सव्वं ज्जेव एदं णत्थि, ता ईदिसो जीअलोअस्स परिवत्तो । (द)

वास । सखि ! सीते ! कथं न पश्यसि रामस्यावस्थाम् । (ध)

कुवलयदलस्निग्धैरङ्गैर्ददौ नयनोत्सवं
सततमपि नि स्वेच्छादृश्यो नवं नवमेव यः ।

साक्षिणो गोदावरीकाननोद्देशाः, त एव जातनिर्विशेषाः मृगपक्षिपादपाः, सैव चाहं मम पुनर्मन्दभागिन्या दृश्यमानमपि सर्वमेवैतत् नास्ति, तदीदृशो जीवलोकस्य परिवर्त्तः ।

विविधविस्रम्भसाक्षिणः नानाप्रकारविश्वस्तशयनविहारादिव्यापाराणां द्रष्टारः गोदावरी-काननोद्देशाः गोदावरीनदीतीरस्थवनप्रदेशाः, जातनिर्विशेषाः पुत्रतुल्याः मृगपक्षिपादपाः पशुपक्षिवृक्षाः । दृश्यमानमपि चक्षुषः प्रत्यक्षीभूतमपि, एतत् सर्वं पञ्चवटीवनादिकं नास्ति न विद्यत इव इति प्रतीयत इत्यर्थः । एतत् सर्वं पञ्चवटीवनादिकं पूर्ववत् अधुना सुखजनकत्वाभावात् मम पक्षे सदपि असत्कल्पमेवेति भावः । इति शोचन्ती सीता स्वयमेवात्मानं सान्त्वयति तदिति । तत्तस्मात् दत्तप्रमोदानामपि आर्य्यपुत्रदर्शना-दीनामिदानीं सुखजनकत्वाभावादित्यर्थः । ईदृशोमत्सदृशः जीवलोकस्य प्राणिजगतः परिवर्त्तः कालक्रमेण सुखिनो दुःखं दुःखिनश्च सुखमित्येवंरूपः विपर्य्यास इत्यर्थः । इति निश्चीयते मयेति शेषः । अतो नानुतापः कर्त्तव्य इति भावः ।

अत्र सुखसाधनीभूतानां पञ्चवटीवनादीनामिदानीं सुखानुत्पादनात् एतन्नास्तीत्यन्वयांशे विशेषोक्तिरलङ्कारः, तथा नास्तीत्यत्र प्रतीयमानोत्प्रेक्षा, तथा तदीदृश इत्यत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासश्च ।

(ध) वासेति । सीतोद्देशेन वासन्त्या उक्तिरियं ननु तां प्रत्यक्षीकृत्येति बोध्यं भागीरथीवरप्रभावात् सीताया अदृश्यत्वात् वाक्यमिदमयथार्थमुक्तमेव । यदि रामावस्थां दृष्टवती तदा अवश्यमेवात्मानं परिसान्त्वयेरिति सख्येत्युक्तानभिप्रायः ।

विकलकरणः पाण्डुच्छायः [१] शुचा परिदुर्बलः
कथमपि स इत्युन्नेतव्यस्तथापि दृशां प्रियः ॥ २२ ॥

सीता। पेक्खामि सहि ! पेक्खामि। [न]

तम। पुत्रि ! पश्यन्ती प्रियं भूयाः। [प]

(न) प्रेक्षे सखि ! प्रेक्षे।

रामावस्थां विवृणोति कुवलयेति। सततमपि सर्वदापि ते तव स्वेच्छया स्वकीय-दर्शनाकाङ्क्षामात्रेण दृश्यो दर्शनयोग्यः नतु कदाचित् कार्य्यव्यपदेशेन दृश्य इत्यर्थः यो रामः कुवलयदलस्निग्धैः उत्पलपत्रवत्चिक्कणैः अङ्गैः हस्ताद्यवयवैः नवं नवमेव अननुभूतपूर्वमेव। नतु द्रव्यान्तरवत् सर्वदैकरूपं नयनोत्सवं नेत्रयोरानन्दं ददौ जनयामासेत्यर्थः। स राम इदानीं शुचा तव वियोगशोकेन विकलकरणः दुर्बलेन्द्रियः, पाण्डुच्छायः श्वेतप्रायकान्तिः, तथा परिदुर्बलः नितान्तबलहीनदेहः कथमपि महाकष्टेनेत्यर्थः सोऽयं राम इत्युन्नेतव्यः अनुमातव्यः अनुमानविषयः जात इति शेषः ; तथापि शोककार्श्याद्विविशिष्टोऽपि दृशां चक्षुषां प्रियः प्रीतिकरः। राम एतादृङ्मधुरमूर्त्तिर्यत् विवर्णकृशदेहोऽपि द्रष्टुर्नयनमाप्याययति इति भावः।

अत्र नवनवप्रकारदर्शनरूपकारणाभावेऽपि नवनवोत्सवरूपकार्योत्पत्तेर्विभावनाऽलङ्कारः, लुप्तोपमा चेत्यनयोरङ्गाङ्गिभावेन सङ्करः।

"कृथाः पुण्यात्वतुल्यमहिमे" ति छन्दोमञ्जरीसमुदाहृतवदत्रापि कथमपि स इत्युन्नेतव्य इत्यत्र न यतिभङ्गदोषः।

"करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपी" त्यमरः।

हरिणी वृत्तम् ॥ २२ ॥

(न) सीतेति। प्रेक्षे प्रेक्ष इत्यवधारणे द्विर्वचनं प्रेक्ष एवेत्यर्थः। दृष्ट्वापि किं कर्त्तव्यं मयेति भावः।

(प) तमेति। पुत्रि ! तनये ! कन्यास्वरूपे ! इति यावत्। प्रियं पतिं राम

---

(१) पाण्डुः सोऽयं इति पाठभेदः।